मार्गशीर्षमासः
वर्षम् –६७
द्वितीयोऽङ्कः
विक्रमाब्द : २०७२
युगाब्द ५११७
५ दिसम्बर २०१५


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका


एकस्याः प्रतेः
१५/–
वार्षिक शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–







## BUILDERS & DEVELOPERS


भारती के सभी पाठकों को दीपावली
की हार्दिक शुभकामनाऐं

# ADITYA PROPCON PVT. LTD.

"MANSROVER" VISHNU GARDEN
TONK ROAD, JAIPUR-302011
FAX : 0141-2723839, E-MAIL : arunudyog@datainfosys.net

**ARUN AGARWAL**
**98290-66606**

**MAHESH SHARMA**
**96107-51960**




।। श्रीशः ।।

ISSN2249-689X

# भारती

संस्कृत-मासपत्रिकायाः





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्री राधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**

जगद्गुरुशंकराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्री चन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्त केशव आप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पाकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकाः

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता

ओ.पी. गोयल

पृष्ठ संयोजन :

**श्याम कम्प्यूटर्स, 22 गोदाम, जयपुर**

rajeshksharma69@gmail.com 01414001974


## मङ्गलाचरणम्

ज्ञानं ज्ञानवतां च यः प्रतिपलं भूतेषु राराजते
भानौ यः प्रतिभासते द्युतिमयो नक्षत्रमध्ये शशि।।
मासानां च सहेति यो निगदितो वह्नौ च तेजोमयः।
एकांशेन च यः स्थितो जगति तं वन्दामहे श्रीहरिम्।।

## मासावतरणम्

शैत्याद् भीतिमुपागताय किरणैः भानुः सुखं यच्छति
स्नानार्थं न सुखाय शीतलजलं मार्गे प्रभाते सदा।
पार्थाय प्रतिबोधितो भगवता मार्गोऽस्मि मासेष्वहम्
भक्त्या पूजनमाचरन्ति सुधियो विष्णुं स्तुवन्ति स्तवैः।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

मार्गशीर्षमासः

वर्षम् 67

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2072

दिसम्बर, 2015

अंक : 2

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

( राजस्थान संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित )

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ५ |
| ४ | महाभाष्यतृतीयाध्यायद्वितीयपादस्य.......... | संजयकुमारशाह | ८ |
| ५ | जलदस्यूनां दर्शनम् | वेणीमाधवधर्माधिकारी | १० |
| ६ | फलितज्योतिषविज्ञाने प्रवृत्तिभेदात्........ | पंकज कुमार शर्मा | ११ |
| ७ | महाकविकालिदासविरचिते विक्रमोर्वशीये..... | अरुणा शर्मा | १२ |
| ८ | ग्रहवेधः वेधशालापरिचयश्च | विनोदकुमारशर्मा | १७ |
| ९ | ग्रन्थसमीक्षणम् | देवर्षिकलानाथशास्त्री | १९ |
| १० | शिक्षा-दर्शनम् | ममता गुप्ता | २१ |
| ११ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २३ |
| १२ | गलज्जलिकाद्वयम् | मिश्रोऽभिराजराजेन्द्रः | २४ |
| १३ | आधुनिककाले संस्कृत-पत्रकारिताया उपयोगिता | डा. घनश्याम बैरवा | २५ |
| १४ | शिवशब्दोच्चारणमात्रेण सिद्धत्वमाप्नुवन्ति जन्तवः | डॉ. गीता शुक्ला | २७ |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | २९ |
| १६ | नारी-स्तम्भः | डा. राजेश्वरी भट्ट | ३२ |
| १७ | प्रेरक-प्रसङ्ग-शतकम् | श्रीमती आराधना धर्माधिकारी | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)

नववर्षारम्भः

# सम्पादकीयम्

❑ पं. प्यारेमोहनशर्मा

महतो हर्षस्यायं विषयो यत् संस्कृतस्य मासपत्रिका भारती षट्षष्टिवर्षाणि पूरयित्वा दीपावलिदिने सप्तषष्टितमे वर्षे प्रविष्टा। षट्षष्टिवर्षेभ्यो निरन्तरं समयेऽबाधगत्या प्राकाशिष्ट। जयपुरात् संस्कृतपत्रिकायाः प्रकाशनं सर्वतः प्रथमं म.म.पं. गिरिधरशर्मचतुर्वेदी भट्टश्रीमथुरानाथशास्त्री पं. सूर्यनारायण व्याकरणाचार्यप्रभृतयो विद्वांसः अकार्षुः। संस्कृतरत्नाकरनाम्ना पत्रिकेयं चिरं जयपुरात् प्राकाश्य-मुपागमत्। तदानीं संस्कृतरत्नाकरे गभीराः प्रौढाः निबन्धाः काव्यानि च प्राकाशिषत। भारते सर्वत्र लब्धादरः संस्कृतरत्नाकरः संस्कृतसाहित्यसम्मेलनस्य मुखपत्र-मजायत। यद्यपि तदानीन्तने समये संस्कृतपत्रस्य प्रकाशनमतीव कष्टसाध्यं कार्यमविद्यत। प्रथमं धनाभावस्ततो मुद्रकानुपलब्धिस्ततश्चाक्षरशोधनम् सर्वाणि कार्याण्यति-कठिनान्यासन्। परन्तु एभिर्मिलित्वा सर्वं संसाधितम्। कविशिरोमणयो भट्टमथुरानाथशास्त्रिणः सर्वात्मना रत्नाकरं सम्यक् समपीपदन्। ततः कानिचिद्वर्षाणि यावत् रत्नाकरः काशीतः प्राकाशिष्ट।

अस्मिन्नेवान्तराले राष्ट्रीयस्वयंसेवकसंघस्य प्रमुखाः प्रचारकाः बाबासाहबआप्टेमहोदयाः संघकार्याय भारते भ्रमन्तो जयपुरमागच्छन्। तेऽचिन्तयन् यत् राष्ट्रीयस्वयं-सेवकसंघस्य संघटनकार्येण सह संस्कृतस्य प्रचारः प्रसारश्च परमावश्यको विद्यते। जानन्त्येव भवन्तो यदाङ्गलशासनं सुस्थिरं सुदृढं च विधातुं संस्कृतस्याध्यनमध्यापनमवरोद्धव्य-मिति मेकालेमहोदयोऽचिन्तयत्। ततश्च भारतीया आङ्गलभाषामेव पठेयुरिति तेन प्रयत्नः कृतः। ये आङ्गलभाषां पठित्वा बी.ए. परीक्षामुदतरन् तेषां समधिकं सम्मानमाङ्गला अकार्षुः। श्रूयते यज्जयपुरे सर्वतः प्रथमं येन बी.ए. परीक्षा समुत्तीर्णा तं सुसज्जिते गजे समुपावेश्य समारोहपूर्वकं राजमार्गेऽभ्रामयन्नाङ्गलाः। कथनस्य तात्पर्यमिदं यदाङ्गलाः शिक्षाक्षेत्रात् संस्कृतमपासारयन् ततश्च शनैःशनै भारतीयानां मानसिकता परिवर्तिता जाता।

अतः बाबासाहबआप्टे महोदया अचिन्तयन् यत् संघकार्यं सुदृढं सुस्थिरं च विधातुं संस्कृतस्य प्रचारः प्रसारश्च करणीयः राजस्थाने सन्ति संस्कृतविद्वासंः। अत्र विद्यते लोकेषु भारतीया संस्कृतिः। इति सर्वं विचार्य ते गिरिराजशास्त्रिणमादिशन् संस्कृतविदुषां संगोष्ठीमेकां विधातुम्। परेद्युरेव गिरिराजशास्त्रिणः ससम्मानं जयपुरीयान् विदुषः समाह्वायन्। तेषां सम्मुखे बाबासाहबमहोदयाः पत्रिकाप्रकाशनस्यावश्यकतां प्रत्यपीपदन्। तेऽकथयन् जयपुरे सन्ति संस्कृतज्ञाः संस्कृतविद्वांसश्च। अतः स्वतन्त्रे भारते भारतीयां प्राक्तनीं संस्कृतिं रक्षितुं संस्कृतस्य पठनपाठनं पत्रिकाप्रकाशनं च भवद्भिर्विधातव्यन्। विद्वांसः पत्रिकाप्रकाशने यत् काठिन्यमस्ति तन्न्यवेदयन्। परंतु ते सर्वेषां समाधानं वयं सर्वे मिलित्वा विधास्याम इत्युक्त्वा सद्यः गिरिराजशास्त्रिणं प्रबन्ध-सम्पादकदायित्वमयच्छन्। इत्थं 1950 वर्षे दादाभाई महोदयानां प्रयत्नेन बाबासाहबमहोदयानामादेशेन ''भारती'' पत्रिका जनिमलभत।

पत्रिकायाः प्रथमसम्पादकाः विद्वद्वरेण्या सुरजन-दसिस्वामिनः समभूवन्। दादाभाईमहोदयानां प्रार्थना-मङ्गीकृत्य श्री स्वामीमहाभागाः भारतीं चिरकालं यावत् समपीपदन्। एते महाभागाः स्वयं लेखका अविद्यन्त। अक्षरशोधनमपि स्वयमकार्षुः। एतेषां प्रेरणयान्येऽपि विद्वांसः पत्रिकायै लेखानलेखिषुः। समये प्रकाशनं भवेदितिधिया अग्रिम मासकृते प्रथममेव लेखानरचयन् विद्वांसः संप्रार्थिताः। दीपावलिपर्वणि वयं प्रथमसम्पादकान् श्री स्वामिमहाभागान् सश्रद्धं संस्मरामः। सुधर्मसभायां समासीनेभ्यो भवद्भ्यः प्रणामाञ्जलिं च समर्पयामः।

भारत्या समये निरन्तरमबाधगत्या प्रकाशनस्य प्रमुखरूपेण सर्वं श्रेयः दादाभाईमहोदयाय गच्छति। श्रीगिरिराजशास्त्रिणः संघकार्येण सम्पूर्णे भारतेऽभ्रमन्। अतः संघकार्येण सह पत्रिकायाः कार्यमकार्षुः। ते धनिकेभ्यः

संस्कृतानुरागिभ्यो भारत्यै धनसंग्रहमप्यकार्षुः। प्रतिमासं धनस्यावश्यकता भवति। अतो विज्ञापनान्यपि प्राप्नुवन्। मुद्रकानशिक्षयन् अक्षरशोधनं कर्तुं सर्वे न समर्था जायन्ते। अतस्तादृशान् पण्डितानक्षरशोधनकार्ये न्ययोजयन् येऽक्षरशोधने निपुणा आसन्। ग्राहकानरचयन्। इत्थं दादाभाईमहोदयेन भारत्याः सर्वविधं कार्यं समनोयोगं विहितम्। तेषां सुदृढेन प्रबन्धेनैव भारती षट्षष्टिवर्षेभ्यो निरन्तरमबाधगत्या प्राकाशिष्ट। अस्मिन् नूतनवर्षप्रवेशावसरे वयं दादाभाईमहोदयान् सश्रद्धं स्मरामः। दिवंगतेभ्यस्तेभ्यः सादरं श्रद्धाञ्जलिं समर्पयामः।

भारत्या द्वितीयसम्पादकाः कविशिरोमणयो नवाचारप्रवर्तका सम्पूर्णभारते विद्वत्सु लब्धादराः नवीनछन्दस्सु संस्कृतकाव्यत्रयितारो भट्ट-श्रीमथुरानाथ-शास्त्रिणः समजायन्त। एते सम्पादनकुशलाः स्वयं हृद्यगद्यपद्यलेखका पत्रपत्रिकासम्पादनकर्मणिदक्षा अविद्यन्त। अतएव एभिः भारत्यां स्तम्भलेखः समारब्धः। स्तम्भलेखानां लेखकाः समये स्वकार्यमपूरयन्। एतेषां सम्पादकत्वे देवर्षिकलानाथशास्त्रिणोऽपि सहसम्पादकत्वं निर्व्यूढवन्तः। वयं नववर्षप्रवेशावसरे परमपूज्यान् भट्टमहोदयान् सादरं स्मरामः। देवसभायां समासीनेभ्यो भट्टश्रीमथुरानाथ-शास्त्रिभ्यः सश्रद्धं प्रणामाञ्जलीः समर्पयामः।

ततः किञ्चित् कालं यावत् धर्मशास्त्राचार्याः पं. श्रीवृद्धिचन्द्रशास्त्रिणः भारतीं समपीपदन्। महाराजसंस्कृत-कालेजे जयपुरे भवन्तः धर्मशास्त्रविभागाध्यक्ष-पदमलञ्चक्रुः। दीपावलिपर्वणि वयं श्रीवृद्धिचन्द्रशात्रिभ्यः सादरं प्रणामाञ्जलिं समर्पयामः।

ततश्चाशुकवयः श्रीहरिशास्त्रिणो भारतीपत्रिकां समपीपदन्। एते साहित्यशास्त्रस्याधिकारिणो विद्वांसः अवर्तन्त। एते चिरंयावत् भारतीं समपीपदन् भारत्यां प्रतिमासं मङ्गलाचरणपद्यं मासवतरणञ्च श्रीमन्तएवालेखिषुः। संमति दीपावलिपर्वणि वयं श्रीहरशास्त्रिणे सश्रद्धं प्रणामाञ्जलिं समर्पयामः। तेषां योगदानं च सादरं स्मरामः।

तदनन्तरं मदीयगुरवो राष्ट्रपतिसम्मानिताः पं. जगदीशशर्मसाहित्याचार्याः पत्रिकायाः सम्पादकपदम-लञ्चकुः। इमे साहित्याचार्याः साहित्यशास्त्रस्य विलक्षणाः विद्वांसोऽवर्तन्त। व्याकरणशास्त्रस्यापि भवन्तोऽधिकारिणो विद्वांसोऽविद्यन्त श्रीमतां सम्पादनकाले धर्माशास्त्रिणः श्रीरामगोपालशर्माणः सहसम्पादकलमकार्षुः। अक्षर-संशोधनं सम्पादकमहोदयाः स्वयमकार्षुः। दीपावलिपर्वणि नववर्षप्रवेशावसरे भारतीपरिवारः श्रीजगदीशाचार्येभ्यः सादरं सश्रद्धं स्वीयां प्रणामाञ्जलिं समर्पयति सश्रद्धं स्मराति च।

जगदीशाचार्याणामनन्तरं राष्ट्रपतिसम्मानिताः श्रीवाणी-अलङ्करणभूषिताः महामहोपाध्यायाः षोडशभाषावेत्तारः संस्कृतहिन्दीआङ्गलब्रजादिभाषरचनाप्रवीणाः केन्द्रीय संस्कृतायोगस्य मान्याः सदस्याः विलक्षणशक्तिसम्पन्नाः सुमधुरभाषिणो देवर्षिकलानाथशास्त्रिणः सम्प्रति संस्कृत-पत्रिकाया भारत्याः प्रधानसम्पादकपदमलङ्कुर्वन्ति। पत्रिकायां नवीनग्रन्थानां समीक्षा भवद्भिर्विधीयते। दीपावलिपर्वणि भारत्याः सप्तषष्ठितमे प्रवेशावसरे भारतीपरिवारः श्रीमद्भ्यो मङ्गलं कामयते सपरिवारेभ्यः भवद्भ्यः सुखसमृद्धिं च कामयते।

आसां पङ्क्तीनां लेखकः प्यारेमोहनशर्मा भारत्याः सम्पादनकार्यं करोमि। प्रतिमासं सम्पादकीयं लिखामि। मङ्गलाचरणं मासावतरणञ्च शार्दूलविक्रीडिते रचयामि। स्वकीयसम्पादकीये समसामायिकचिन्तनं प्रमुखरूपेण लिखामि। संस्कृतपाठका अपि सामयिकराजनीति-सामाजिकव्यवस्था महिलासंरक्षणादिभिः परिचिता भवेयुः, राष्ट्रविकासाय विचारये: इतिधिया सम्पादकीये समसमायिक विषयानादाय किमपि निवेदयामि। अस्मिन् नवर्षप्रवेशावसरेऽहं सर्वेभ्यो लेखकेभ्यः पाठकेभ्यश्च मङ्गलं कामये। आत्मनः कृते च सर्वेभ्यः शुभाशीर्वादं याचे।

सम्प्रति भारत्याः प्रबन्धकसम्पादकधुरं वहन्ति श्रीसुदामाशर्माणः। पत्रिकायाः प्राणभूता भवन्ति प्रबन्ध-सम्पादकाः। दादाभाई गिरिराजशास्त्रिणोऽनन्तरं श्रीसुदामा-शर्ममहाभागाः प्रबन्धसम्पादकपदे नियोजिताः। आस्मिन् भारत्याः सप्तषष्तिमेवर्षप्रवेशावसरे दीपावलिपर्वणि प्रबन्धसम्पादकेभ्यः श्रीसुदामाशर्मभ्यः सुखमयं स्वस्थं जीवनं कामयते आशीर्वचांसि च प्रयच्छति भारतीपरिवारः। अस्माकं

लेखिकासु डा. राजेश्वरीभट्टमहोदया विंशतिवर्षेभ्यो निरन्तरं नारीस्तम्भाय लेखान् लिखति। डा. स्वयं लेखिका विद्यते। अनया अद्यावधि पञ्चशतं कथा: लिखिता: परन्तु न मुद्रायिता भारत्यां प्रतिमासं भवत्या हिन्द्यनुवादसहिता नारीस्तम्भलेखो लिख्यते। भारतीपरिवारो भारत्या नववर्षप्रवेशावसरे दीपावलिपर्वणि च भवत्या मङ्गलं सुस्वास्थ्यं च कामयते।

आयुर्वेदस्तम्भलेखका: स्वनामधन्या आयुर्वेद-विश्वविद्यालयस्य कुलपतिचरा: भारत्यां संस्कृते आयुर्वेदस्य स्वास्थ्यसम्बन्धिन: संहिताग्रन्थेषु प्रदर्शितानुपायान् हिन्द्यामपि सर्वजनसौकर्याय प्रौढभाषायां लेखका: श्रीमन्तो बनवारीलालगौडमहोदया: भारत्या: सप्तषष्ठितमे वर्षप्रवेशावसरे दीपावलिपर्वणि ससम्मानं प्रणम्यन्ते। भारतीपरिवारो भवद्भ्यो मङ्गलं सुस्वास्थ्यं च कामयते।

भारत्या: प्रमुखसंरक्षका विद्यन्ते जगद्गुरवो निम्बार्कपीठाचार्या: श्री राधासर्वेश्वरशरणदेवाचार्या: जगद्गुरुशंकराचार्यस्वामिजयेन्द्रसरस्वतीमहाभागाश्च अस्मिन्नववर्षप्रवेशावसरे वयमेभ्य: प्रणामाञ्जलीन् समर्पयाम: शुभाशीर्वादञ्च कामयामहे। पत्रिकाया: प्रेरणास्रोतोभूतान् स्व. श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागान् सादरं स्मराम: प्रणामाञ्जलिं च समर्पयाम:।

भारत्या: संस्थापका आसन् स्व: श्रीमन्त: उमाकान्त-केशवआप्टेमहोदयास्तथा स्व. दादाभाई गिरिराजशास्त्रिण:। नूतनवर्षप्रवेशावसरे वयमुभाभ्यां प्रणामाञ्जलीन् समर्पयाम: सश्रद्धं स्मरामश्च।

संस्कृतपत्रिकाया भारत्या: संरक्षका विद्यन्ते स्वामिनो विश्वेशतीर्थस्वामिन: सत्यमित्रानन्दगिरय: स्वामिनो रामभद्राचार्यां: आचार्य अविचलदासमहाभागा: स्वामिनो विद्यानन्दसरस्वतीमहाभागाश्च। एम्य: सर्वेभ्यो दीपावलि-पर्वणि सप्तषष्टितमे वर्षे प्रवेशावसरेच वयं सादरं सश्रद्धं प्रणामाञ्जलीन्: समर्पयाम:।

सहसम्पादकेषु श्रीसुरेन्द्रकुमारशर्माण: श्रीशिवशरणनाथ त्रिपाठीमहोदया: श्रीशिवचरणशर्माण: सहसम्पादकधुरं वहन्ति। अस्मिन् शुभावसरे वयं सर्वेभ्य: श्रीमद्भ्य: सहसम्पादकेभ्यो मङ्गलं कामयामहे। आर्थिकपरामर्शदातृभ्यो विज्ञापनदातृभ्यश्च भारतीपरिवार: सर्वेभ्यो मङ्गलं कामयते। सर्वेभ्य: लेखकेभ्य: भारतीपरिवारो मङ्गलं कामयते। भतौ भवन्तो भद्राणि पश्यन्तु। भारत्या सवैतनिकौ सेवकौ विद्येते श्रीअविनाशस्तथा राजीव:।उभयो: कार्य महत्वपूर्णं कठिनं च विद्यते। परन्तुभवन्तौ कर्तव्यभावनया सर्वं कार्य विदधत:। समये पत्रिकाप्रकाशने चोभयो: सहयोग: प्रशंसनीयो विद्यते। वयमुभाभ्यां कृते मङ्गलं कामयामहे।

**संस्कृतसमाचार:**

## पं. मोहनलालपाण्डेयस्य स्वर्गारोहणम्

जयपुरस्य विख्यातो विद्वान्, राष्ट्रपतिसम्मानित: अन्यैश्च विविधपुरस्कारै: सभाजित:, ''पद्मिनी'' गद्यकाव्य प्रणेता पं. मोहनलाल पाण्डेय: 30 अक्टूबर दिवसे प्रातर्दिवमारुरोह। एकाशीतिवर्षीयोऽयं मनीषी 1934 ई. वत्सरे जनिमलभत। विविधशास्त्राध्ययनं विधाय सोऽयं राजस्थान सर्वकारीय संस्कृतमहाविद्यालेषु प्राध्यापकपदं प्राचार्यपदं चाध्यतिष्ठत्। ''पत्रदूतम्'' ''नतितति:'' संस्कृतकाव्यकौमुदी, समस्या-सौहित्यमित्यादि-काव्यग्रन्था:, विभिन्न पूजापद्धतयश्चैतेन विलिखिता: सर्वत्र समाद्रियन्ते। श्रीरामचरिताब्धिरत्नमहा-काव्यस्यानुवाद:, ''स्वातिन्त्र्य-सहयोगिन:'' राजस्थान गौरवम् इत्यादि राजस्थान संस्कृत अकादमी ग्रन्थानां स्वरमङ्गला-पत्रिकायाश्च सम्पादनं चाप्यनेन कृतम्। माघपुरस्कार:, हारीतरशिसम्मान:, वाचस्पति-पुरस्कार:, भट्टमथुरानाथ-शास्त्रि साहित्य सम्मान:, श्रीवाणी अलङ्करणम् इत्यादिभिरनेकै: पुरस्कारै: सम्मानितोऽयं 2000 ई. वर्षे राष्ट्रपतिपुरस्कारं लब्धवान्। एतस्य कृतित्वमवलम्ब्यानेके शोधार्थिन: शोधोपाधीनलभन्त। भारतीपत्रिकापाठका-एतस्य कृतित्वेन सुपरिचिता यतोऽस्य काव्यकृतयो निरन्तमस्यां पत्रिकायां प्राकाश्यन्त। एतस्य सुयोग्यस्तनय: प्रो. डॉ. ताराशङ्करशर्मा पाण्डेयोऽत्र जगद्गुरुरामानन्दाचार्य राजस्थानसंस्कृत-विश्वविद्यालये साहित्यविभागस्याचार्य-पदमलङ्करोति, एतस्य वैदुष्यपरम्पराया: सातत्यं च निर्वहति। भारतीपत्रिका-परिवारो विद्वद्वर्यस्य पं. मोहनलालपाण्डेय-स्यापूरणीयां क्षतिं विलपन् साश्रु श्रद्धाञ्जलिमस्मायार्पयति, एतस्य सद्गतये च परमात्मानं प्रार्थयति।

# महाभाष्यतृतीयाध्यायद्वितीयपादस्य ''कर्मण्यण्'' इति सूत्रस्यार्थविमर्शः

❑ संजयकुमारशाह

विश्वस्य सर्वासु भाषासु संस्कृतम् प्राचीनतमा भाषा विद्यते। संस्कृत-भाषा केवलं साहित्यिकभाषैव नासीदपितु व्यवहारभाषाऽपि आसीत्। प्राचीनकाले भाषेयं नितान्तमेव व्यवहारोपयोगिनी भाषा आसीत्। संस्कृभाषा हि ''देवभाषा'' नाम्नाऽपि सम्बोध्यते। संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः! अनादिनिधना नित्या विद्यते या च ब्रह्मणा (स्वयंभुवा) आदौ वेदमयी दिव्या सृष्टा यतः सर्वाः शब्दार्थरूपाः प्रवृत्तयः समुद्भूताः सन्ति इत्यादिभिः वचनैर्ज्ञायते यत् संस्कृतभाषैव देवभाषा विद्यते। देवाः प्रथमं दैवीं वाचमजनयन्त तां विश्वरूपाः पशवो वदन्ति।3 देवाः यां दिव्यां वाचमजनयन्त तां सर्वे मनुष्याः वदन्ति। प्राचीन-काले वैदिकभाषैव जनभाषा आसीत्। प्रारम्भकाले इमे शब्दाः लौकिकाः इमे च वैदिकाः एतादृग् विभागो नासीत् अतएव महर्षिणा जैमिनिना प्रोक्तम् यज्ञादिकर्मबोधकवाक्यानां श्रुतौ उपलब्धत्वात् लौकिकवैदिकपदयोरेक एवार्थो विद्यते। 4 अस्य सूत्रस्य व्याख्यायां शबरस्वामिना विलिखितं यत् ये लौकिक शब्दाः त एव तेषामर्थाः त एव वैदिकाः सन्ति।5

1 काव्यादर्शः (दण्डी) 13/3

2 अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।। महाभारतम् (शान्ति.प. 232/24)

3 दैवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। ऋ.सं. 8/100/1

4 प्रयोग चोदना भावादर्थैकत्वमविभागात्। मीमा. सूत्रम् 1/3/30

5 य एव लौकिकास्त एव वैदिकास्त एव तेषामर्थाः। मीमा. सू. (शावरभाहय) 1/3/30

सम्प्रति संस्कृतभाषायाः ''लौकिक वैदिक'' भेदेन द्विविधं रूपं प्राप्यते। महाभाष्ये विषयेऽस्मिन् अत्युत्तमं वर्णनं कृतमस्ति तत्रोक्तम्-लौकिकानां वैदिकानां च तत्र लौकिकास्तावत्-गौः, अश्वः, पुरुषः, हस्ती, शकुनिः, मृगः, ब्राह्मणः इति। वैदिकाः खल्वपि शन्नो देवीरभिष्टये, इषे त्वोर्जेत्वा, अग्निमीले पुरोहितम्, अग्न आयाहि वीतये।

कस्याश्चिद् भाषायाः स्वरूपावबोधनाय व्याकरणस्य ज्ञानमनिवार्यम्। यास्कादारभ्य सर्वे एव प्राञ्चो विद्वांसो वैयाकरणा वा संस्कृतं भाषानाम्ना सम्बोधयन्ति। तत्र भाषित्वमेव भाषाया भाषात्वम्। ''दूराद् ह्वयते''। अन्तिमः स्वरः प्लुतो भवति इति संस्कृत-भाषायाः सर्वजनभाषात्वरूपं प्रकटयति। एकस्यैव शब्दस्य एकाधिकरूपाण्यपि अस्याः भाषायाः भाषित्वमधिकृत्यैव सम्भवन्ति तद्यथा तव, मम, मे, माम्, अस्मान् अस्माकं, मा. त्वा, गवाक् शब्दस्य नवाधिकशतरूपाणि अस्याः भाषायाः भाषित्वरूपमेव द्योतयन्ति। व्याकरणानां बाहुल्यं मतान्तरञ्च यथा-लोपः शाकल्यस्य 2, अवङ् स्फोटायनस्य 3, ऋतो भारद्वाजस्य, 4 एङ् प्राचांदेशे 5, एकश्रुति दूरात्सम्बुद्धौ 6 रूपादाहत-प्रशंसयोर्यप् इत्यादि सूत्राणि अस्या भाषायाः भाषित्वरूपमेव बोधयन्ति।

विदुषां मतमिदं यत् संसारे यावज्ज्ञानं विद्यते तन्मूलम् वेदा एव विद्यन्ते। मनुना मनुस्मृतौ 'सर्वज्ञानमयो हि सः' इत्यादिभिः वाक्यैरिदमेव निगदितम्। लौकिकवैदिक-संस्कृतयोः स्वरूपावबोधनाय दाक्षीपुत्रेण अष्टाध्यायी विरचिता। अष्टाध्यायां 3995 सूत्राणि विद्यन्ते। पाणिनेरष्टाध्यायी एका एव सर्वाङ्गपूर्णा कृतिरस्ति।

1. अष्टाध्यायी दूराद्धूते च 8/2/84 2. अष्टाध्यायी 8/3/19
3. अष्टाध्यायी 6/1/123 4. अष्टाध्यायी 7/2/63
5. अष्टाध्यायी 1/1/25 4. अष्टाध्यायी 1/2/33

अत्र लौकिकवैदिकोभयविधशब्दसिद्धये नियमादयोऽपूर्वा संगृहीताः सन्ति। अस्मिन् शब्दानां वैज्ञानिकं विवेचनं जातम्। अत्र प्रकृतिप्रत्यययोः सम्यक् प्रतिपादनं कृतम्। शब्दसिद्धिप्रकारनिर्धारणं निश्चितम्। सार्वजनीन-सर्वाङ्गीणविशुद्धायाः पद्धतेर्निर्माणमजायत यस्य तुलना विश्वस्य केनापि व्याकरणेन नैव कर्तुं शक्यते।

अष्टाध्याय्याः सूत्राण्याधृत्य कात्यायनेन वार्तिकानि विरचितानि। महाभाष्यं व्याकरणशास्त्रस्य मान्यो ग्रन्थो विद्यते, तथापि अन्य व्याकरणग्रन्थवदयं ग्रन्थः शुष्क एकाङ्गी च नास्ति। ग्रन्थेऽस्मिन् व्याकरणसदृशस्य क्लिष्टस्य विषयस्य अत्यन्तसरलप्राञ्जलया सरण्या प्रतिपादनं कृतमस्ति। अस्य भाषा दीर्घपदसमासरहिता, लघुलघुतरवाक्यकदम्बकैः सम्पृक्ता, प्रश्नोत्तरसनाथा सरला, सरसा मञ्जुला चास्ति। लेखनशैलीदृष्ट्या ग्रन्थोऽयं संस्कृत वाङ्मयेऽद्भुतो वर्तते। न कोऽपि ग्रन्थ एतद् रचनाशैलीसमतां विधातुं समर्थोऽस्ति।

महाभाष्ये 'कर्मण्यण्' सूत्रविषये यत्किञ्चिदुक्तं तस्यात्र विचारः क्रियते। कर्मणि अण् इति पदच्छेदः। अत्र धातोरिति सूत्रस्याधिकारः समायाति। अधिकारत्वञ्च स्वदेशे वाक्यार्थशून्यत्वे सति, उत्तरोत्तरफलजनकत्वम्। एवं प्रकृतसूत्रस्यार्थः विद्यते-कर्मण्युपपदे सति धातोरण् प्रत्ययः स्यादिति। यथ-कुम्भं करोतीति कुम्भकारः, नगरं करोतीति नगरकारः।

कर्मणीति। निर्वर्त्यमानविक्रियमाणे चेति वक्तव्यम्। इह मा भूद्-आदित्यं पश्यति। हिमवन्तं शृणोति, ग्रामं गच्छतीति। महाभाष्यस्य तृतीयेऽध्याये 'कर्मण्यण्' इति सूत्रादारभ्य 'व्रते' इति सूत्रपर्यन्तं प्रदीपोद्योतयोः टीकयोः वैशिष्ट्यसमीक्षणम् कृतम्।

''कर्मण्यण्'' सूत्रस्य व्याख्यायां प्रदीपे प्रतिपादितं यत् निर्वर्त्यमानेति-हरिणा निर्वर्त्यादीनां विशेषो दर्शितः-सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते1 अस्य व्याख्यायां नागेशभट्टेनोद्योते बोधितं सती परिणामिनी प्रकृतिर्नाश्रीयते यस्य चाऽविद्यमाना तन्निर्वर्त्यमित्युच्यते। अत्र 'अस्य' पदस्य व्याख्यायां बोधितं यत् कार्यसमानाधिकरण्येन प्रतीयमानं नास्तीत्यर्थः यथा-मृदं घटं करोति इत्यादिभिः वाक्यैः उभयोरपि टीकयोः सूत्रमिदं व्याख्यातम् इत्यादयो विषयाः प्रकरणेऽस्मिन् बोधिताः सन्ति।

1. महाभाष्यम् (प्रदीप) 3/2/1 (1 मा) पृ. 229

प्राध्यापकः
राज.वरि.उपा.संस्कृत-विद्यालयः गनोड़ा (बांसवाड़ा)
मो.: 9414725546

हार्दिक शुभकामनाओं सहित :-

ए इन्फ्रास्ट्रक्चर लिमिटेड
निर्माता
ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

छत्त एक, लाभ अनेक


हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णनम्

# जलदस्यूनां दर्शनम्

( पूर्वतोऽनुवृत्तेम् )

❑ वेणीमाधवधर्माधिकारी



पुन: सन्ध्यासमय: संजात:, एकस्मिन् स्थाने द्वे महती नौके रज्वाबद्धे आस्ताम्। गतरात्रिवत्स्थानं तु निर्जनमेवासीत्परमेतयोर्नौकयो: साहचर्यवशाद् गुमाईमहोदय: एताभ्यां विशालाभ्यां नौकाभ्यां सह स्थातुमुचितं मत्वा ताभ्यां सहैव स्वनौकामप्यबध्नात्। विशालनौकयोर्नाविकै: सह परिचय: समभवत्। स्वल्पसमयेनैव तै: सह मैत्रीभाव: सम्पन्न:। विशालनौकयोर्नाविकानां समीपे सर्वविधा पूर्णा व्यवस्था आसीत्। अस्माभिर्नौकयोर्मध्ये गत्वा भोजनं निर्मितम्। यावद्दिनं क्षुधार्त्तास्तेन भोजनं स्वादिष्टमभवत्। ततो निश्चिन्ता भूत्वा नौकायामेव सुप्ता:।

प्राय: द्विवादनसमये रात्रौ सहसा सर्वे नाविका: जागृता अभूवन्। आक्रोशं च चक्रु: मारयत, मारयतेति ध्वनयोऽपि समभवन्। भयभीता वयमपि जागृता: दृष्टं यद् द्वयोर्लघुनौकयोर्मध्ये अष्ट दश वा जना: अस्माकं नौकानां समीपत एव तीव्रगत्या धावमाना: पलायिता:। अस्माभिर्नावबुद्धं केयं घटनेति। पश्चान्नाविकैरवबोधिता: यत् तयोर्नौकयोर्मध्ये दस्यव आसन्, ये नाविकान् लुण्ठन्ति। समये जागरणेन ते पलायिता:।

एतस्या: घटनाया: पश्चाद् निद्रागमनं कठिनमेवासीत्। घटनायाश्चर्चायां कश्चित् समयो व्यतीत:। वयं हस्तौ पादौ प्रक्षाल्य सज्जीभूता:। गुमाईमहोदय: नाविकान् रामरामेत्युक्त्वा नौकामुदघाटयत्। वयमियत्या तीव्रगत्या वर्द्धमाना आस्म यत् सूर्योदये जायमाने शोणपुरस्य सेतुर्दृश्यमान आसीत्। शोणपुरे गंगागंडक्योर्मिलनं भवति। तदिदं मिलनस्थानमस्ति। अत्र विशालो मेलक: प्रतिपर्वणि सम्पन्नो भवति। इदं संगमक्षेत्रं हरिहरक्षेत्रमपि वदन्ति। अस्मिन् संगमक्षेत्रे मेलके विशालो जनसमूह: एकत्रितो भवति। परमस्मिन् समये तु अपारो जलसागर एव परितो दृष्टिगोचरो भवति वर्षाकालवशाद् गंगायामपि तीव्रा वृद्धिरासीत्। अभितो जलमेव दृश्यतेस्म। अधुना शोणपुरेऽस्माभि: पूर्वंगण्डकी पश्चाच्च गंगाप्युत्तरणीया आसीत्। हरिहरक्षेत्रे गुमाई महोदय: नौकां तटे अस्थापयत्। हस्तौ पादौ प्रक्षाल्य वयं सज्जीभूता: गुमाईमहोदय: नौकाच्छादनवस्त्रं (पाल) सुबद्धमकरोत्। वयं नौकायामुपविष्टा:। तदैव गुमाईमहोदय: नौकाया रज्जुं धृत्वा नावं तटे तटे पश्चिमां दिशं प्रति बहुदूरमाकृष्टवान् गंगायास्तीव्रे प्रवाहे नौका कियत्या तीव्रगत्या अग्रे वर्द्धिष्यति एतस्यानुमानं कृत्वा गुमाईमहोदयोऽपि नौकामारूढ:। चालनकाष्ठं सज्जीकुर्वन्नाप्टे महोदयमुक्तवान् बाबामहोदय ! कथं न बिभेषि पूर्वीयो वायुरस्ति सावधान उपविश। स नौकाया आच्छादनवस्त्रमुदघाटयत्। अहं शकुनिरोझा च आच्छादनस्योभयभागौ दृढं धृतवन्तौ। गंगामातुर्जयेति जयकारं कुर्वन्नौका मोचिता।

धर्माधिकारिभवनम्
ब्रह्मपुरी, जयपुर

# फलितज्योतिषविज्ञाने प्रवृत्तिभेदात् फलितविनिर्णयः

❑ पंकज कुमार शर्मा

व्यवहारे पुंस्त्रीजातकयोः लौकिककार्यप्रवृत्तौ अन्तरं दृश्यते। ज्योतिषशास्त्रानुसारं जन्मकालिक-ग्रहनक्षत्राणां यादृशी प्रवृत्तिर्भवति तदनुसारम् एव तयोः प्रवृत्तिः सम्भवति। कस्मिन्नपि भावे ग्रहविशेषस्य प्रवृत्तेर्निर्धारणाय ग्रहाणां प्रकृतिः आधीयते। ग्रहः किंविधो वर्तते ? इति विज्ञातुं बहवः आधाराः अस्माकं पुरतः विचारणीयाः भवन्ति। यथा –

1. ग्रहः उदितो अस्ति, वक्री, मार्गी अथवा अस्तो विद्यते इत्यस्य ज्ञानम्।
2. ग्रहः कस्याम् अवस्थायां विद्यते? जागृतावस्थायाम् अस्ति, सुप्तावस्थायाम् अस्ति अथवा दीप्तमुदितादि-अवस्थासु कामावस्थाम् उपगतो वर्तते।
3. ग्रहः पृथिव्यादि पञ्चतत्वेषु केन तत्वेन सम्बद्धो वर्तते ? इत्यस्य ज्ञानम्।
4. ग्रहस्य कीदृशं बलं विशिष्टं विद्यते यथा – दिग्बलं विशिष्टम् अस्ति अथवा दृष्टिबलं विशिष्टम् अस्ति अथवा हीनबली अस्ति इत्यादेः ज्ञानम्।
5. ग्रहाणाम् उच्चत्वनीचत्वादेः ज्ञानं, परमोच्चांशेषु स्थितिविशेषस्य ज्ञानं, तथैव च परमनीचांशेषु स्थितिविशेषस्य ज्ञानम्।

उपरिदर्शितप्रमुखानाम् आधाराणाम् अनुसारमेव ग्रहः प्रवर्तते। तस्य प्रभावोऽपि तदनुकूलमेव भवति, किन्तु पुरुषसंज्ञकग्रहाणां प्रभावः पुरुषेषु विशिष्टो भवति। तथैव च स्त्रीसंज्ञकग्रहाणां प्रभावः विशिष्टो भवति तदा तस्मिन् पुरुषे कार्यव्यवहारे स्त्रीवत् प्रवृत्तिः दृश्यते। एवमेव स्त्रियः जन्मकुण्डल्यां पुरुषग्रहाणां प्रभावः विशिष्टो भवति, तदा तस्याः स्त्रियः प्रवृत्तिः पुरुषवत् दृश्यते। अनेन पुंस्त्रीजातकयोः प्रवृत्तिभेदः, स्पष्टम् उपलक्ष्यमाणो भवति।

ग्रहाणां नक्षत्रविशेषे परिभ्रमणस्यापि महत्त्वम् अस्मिन् सन्दर्भे विज्ञातव्यम्। नक्षत्रविशेषे विद्यमानो ग्रहः तस्य नक्षत्रस्य गत्यापि प्रभावितो भवति। तत्प्रभावस्य अवतरणं जातकेऽपि स्पष्टम् उपलक्ष्यमाणं भवति। यदि नक्षत्रे नक्षत्रस्वामी एव प्रवर्तते, तदा जातकस्य कृते लाभविशेषः मन्तव्यः अथवा तन्नक्षत्रं यत् फलं प्रददाति तदुपलब्धौ न काऽपि बाधा समायाति।

किन्तु यदा नक्षत्रविशेषे नक्षत्रस्वामिनः शत्रुग्रहस्य प्रवृत्तिर्भवति तदा नक्षत्रफलोपलब्धौ सः ग्रहः बाधको भवति। सूर्यनक्षत्रात् आरभ्य जन्मनक्षत्रं यावत् मध्यपातिनक्षत्राणाम् अधिष्ठिताः ग्रहाः अपि जातकस्य जीवने प्रभावकारिणो भवन्ति। अत्रापि पुंस्त्रीजातकयोः विषये फलितभेदः प्रवृत्तिभेदात् संभवति।

नक्षत्रप्रवृत्तेरतिरिक्तं योगप्रवृत्तिरपि पुंस्त्रीजातकयोः फलितभेदविषये साधीयसी भवति। यद्यपि योगानां नामानुसारं फलकथनं कृतं वर्तते, किन्तु ग्रहनक्षत्रयोः प्रवृत्त्यनुसारम् एव योगफलं घटते। अतएव विसंगतप्रवृतौ योगफलादीनि निष्फलानि भवन्ति।

जन्मकुण्डल्यां ग्रहनक्षत्राणां प्रवृत्तेः यथा प्रभावः निपतति, तथैव द्रेष्काण-सप्तमांश-नवांश-द्वादशांश-षोडशांश-त्रिशांश प्रभृतिषु कुण्डलीसु अपि ग्रहप्रवृत्तिवशात् फलभेदः विज्ञायते। एवमेव गण्डान्तनक्षत्राणां संदर्भेऽपि निर्णयः विधातुं शक्यते।

श्री महाकाली माता मन्दिर,
सैक्टर नं. 8, मालवीय नगर, जयपुर



# महाकविकालिदासविरचिते विक्रमोर्वशीये औचित्यप्रयोगाणां मीमांसा

❑ अरुणा शर्मा

कविकुलगुरुर्महाकविः कालिदासो न केवलं स्वरचितेषु महाकाव्येष्वेव शास्त्रीयतत्त्वसन्निवेशसन्दर्भे औचित्यस्यानुपालनं करोति अपितु स्वरचितेषु नाटकेष्वपि स्वकवित्वकलाया निदर्शनं प्रस्तोतुमसौ सर्वथा प्रयतमानोऽस्ति। विक्रमोर्वशीये मालविकाग्निमित्रे अभिज्ञानशाकुन्तले च सर्वत्र औचित्यस्योदाहरणानि द्रष्टुं शक्यन्ते येषां मीमांसया महाकवेरमुष्य न केवलं शास्त्रीय-तत्त्वोपस्थापने पारगामिता प्रमाणिता भवति अपितु निर्दुष्टं कवित्वमुप-स्थापयितुं सततप्रयत्न-शीलताऽपि स्पष्टीभवति। अत्र विक्रमोर्वशीय-नाटकस्य उदाहरणानि यथोद्दिष्टक्रमेण उदाहृत्य मीमांस्यन्ते।

विक्रमोर्वशीयस्य प्रथमाङ्के पदौचित्ययोजना प्रारम्भे एव विहिताऽस्ति। अत्र वक्त्रौचित्यप्रयोगाणामपि सुललिता प्रस्तुतिः द्रष्टुं शक्यते। अलंकारौचित्यं तु भूयसा प्रयुक्तम्। यत्र कुत्रचित् वाच्यौचित्यम् रसौचित्यम् अवस्थौचित्यं चाप्यवलोकयितुं शक्यते।

तत्रादौ पदौचित्यं यथा –

**ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री,**
**कैलासनाथमनुसृत्य विवर्त्तमाना।**
**बन्दीकृता विबुधशत्रुभिरर्धमार्गे,**
**क्रन्दत्यतः करुणमप्सरसां गणोऽयम्।।**

अस्मिन्नुदाहरणे कथासूत्रविन्यासोपक्रमे उर्वश्या अपहरणस्य कारणात् अप्सरसां समूहस्य करुणक्रन्दनं विषयत्वेन समुपवर्णितम्। वर्णनेऽत्र 'कैलासनाथ' मिति पदं कुबेरस्य कृते प्रयुक्तम्। यद्यपि 'कैलासनाथ' मिति पदं लोके शिवस्य कृते अधिकतरं प्रयुज्यते तथापि कैलासे शासनाधिकारसम्भावनया कुबेर इति प्रकृतार्थं बोधयति।

अपि च 'यक्षराज नमस्तुभ्यं शंकरप्रियबान्धव' इत्यादिस्मरणादपि यक्षराजः कुबेर एव कैलासनिवासिनां यक्षाणां राजा आसीत् इति स्पष्टमेवास्ति। एवमेव 'नरसखस्य' इत्यत्र नरसखः नारायण इति अर्थं बोधयति। नर-नारायण-योरुभयोर्युगपत्सम्भवान्नारायणार्थेऽस्य पदस्य प्रयोगोऽपि पदौचित्यमेव सूचयति।

**अथ वक्त्रौचित्यं यथा–**

तृतीयाङ्के राजानं प्रत्युच्यमाने काञ्चुकीयवचने –

**परिजनवनिता करार्पिताभिः,**
**परिवृत एव विभाति दीपिकाभिः।**
**गिरिरिव गतिमानपक्षसादा-**
**दनुतटपुष्पितकर्णिकारयष्टिः2।।**

उदाहरणपद्येऽपि काञ्चुकीयो वक्ता 'स च सन्ध्याकालस्य वर्णनानन्तरं राज्ञ आगमनस्य वर्णनं करोति। आगमनकाले परिजनवनितानां करस्थाभि-र्दीपिकाभिः राजा आवृतो-ऽस्तीत्यनेनास्य महत्परिकरशालित्वं सूच्यते। एवमेव गिरिरिव इति कथनेन राज्ञोऽमुष्य सार्वकालिकं सार्वदैशिकं च उन्नयनं सः सूचयति। गिरितटेषु कर्णिकारयष्टयो दृश्यमाणाः सन्तीति कथनेन अनेकेषामयोपजीविनां विद्यमानतां सः सूचयति। एवं वक्ता स्वकथने एव राज्ञो व्यक्तित्वस्य वैशिष्ट्यं समग्रं बोधयतीति वक्त्रौचित्यस्योदाहरणमिदं विज्ञेयम्।'

अपरत्रापि चतुर्थाङ्के नेपथ्यात् विधीयमाने मयूरस्य वर्णनप्रसङ्गे पवनमुपालम्भं प्रददतः कस्यचित्पात्रस्योक्ति-रियम्-

**मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्**
**घनरुचिरकलापो निःसपत्नोऽद्य जातः।**
**रतिविगलितबन्धे केशहस्ते सुकेश्याः,**
**रतिकुसुमसनाथे किं करोत्येष बर्ही।।**

उदाहरणेऽस्मिन् पुरुरवा मयूरं दृष्ट्वा स्वप्रियापहरणं विषयीकृत्य पवनमुपालभते। पुरुरवस उक्तौ मयूरोऽयं निस्सपत्नः जात इत्यनेन प्रतियोगिककार्यकलापानां शून्यता एव सूचिता, यतो हि प्रियाया उर्वश्या केशकलापः मयूरस्यास्य केशकलापस्य प्रतियोगी आसीत्। अपि च पूर्वानुभवं निरूपयन् पुरुरवा कथयति यत् रतिक्रीडाकाले विगलितकेशपाशं हस्ते नयन्तीं ताम् अयं मयूरः विलोकयन् कदाचित् सलज्जो भवति स्म किन्त्वद्य तदभावे लज्जाशून्य इव दृश्यते। एवं वक्तुः कथनं प्रियाया अभावे पूर्वानुभवानां प्रकटनेन सह खेदाभिव्यक्त्यै कथनस्य सापेक्षत्वात् प्रासङ्गिकत्वाच्च वक्त्रौचित्यमेवात्र स्पष्टीभवति। अन्यत्राप्य-

स्मिन्नेवाङ्के पुरुरवसो विलापे हंसं लक्ष्यीकृत्य प्रदीयमाने उपालम्भवचने –

**हंस, प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता।**
**विभावितैकदेशेन देवं यदभियुज्यते[3]।।**

उदाहरणेऽस्मिन् हंसस्य गतौ स्वप्रियाया गतेः दर्शनं कृत्वा पुरुरवा हंसमुपालभते यत् त्वया मम प्रियायाः गतिः कदाचिद् हृता तां त्वं पुनः तस्यै प्रयच्छ। सम्भवतः मम प्रियाऽपि त्वयैव हृताऽस्ति। यतो हि तदीयैकं वस्तु त्वत्पार्श्वेऽस्ति अतएवानेन प्रमाणेन इदं प्रमाणितमेवास्ति। एवञ्चेत् त्वं मम प्रियां मह्यं देहि। अत्र तत्प्रदानाभावे त्वं चौर्यवशाद् दण्ड्यो भवितेति गूढार्थोऽपि विज्ञापितो भवति। अतएव वक्त्रौचित्यस्योदाहरणमिदम्।

**अथ अवस्थौचित्यं यथा–**

चतुर्थाङ्क एव नदीं दृष्ट्वा उर्वश्यास्तस्यां परिणतिमुपकल्प्य कविना नायिकाया उर्वश्या अवस्थायाश्चित्रणं साधूपस्थापितम् –

**तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना,**
**विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।**
**यथाविद्धं यान्ती स्खलितमभिसन्धाय बहुशो,**
**नदीभावेनेयं ध्रुवमसहमाना परिणता[4]।।**

पुरुरवसो विलापवाक्यरूपेणोपनिबद्धे उदाहरणपद्ये पुरुरवा अपहृताया नायिकाया उर्वश्यास्तात्कालिकीम् अवस्थामुपकल्पयति। नदीं दृष्ट्वा नद्या अनुरूपम् उर्वश्याः क्रियाणां परिणतिः सञ्जातेति स निर्दिशति। तथा हि भ्रूचाञ्चल्यात् तरङ्गयुक्तत्वं, खगश्रेण्याकुलतया रशनायुक्तत्वम् कोपनात् शैथिल्यम् अञ्चलप्रान्तकर्षणात् फनयुक्तत्वं, गतिवशात् कौटिल्यम्, अनपराधतया असहिष्णुत्वं च यथा नद्या अवस्था तथैव तदीयाऽप्यवस्था सम्भाव्येति प्रासङ्गिकत्वात् विलपने पूर्वस्मृत्युद्बोधकत्वाच्चात्र अवस्थौचित्यं स्फुटमेव।

**अन्यत्राप्यस्मिन्नेवाङ्के –**

**रक्तकदम्ब, सोऽयं प्रियया घर्मान्तशंसि यस्यैकम्।**
**कुसुममसमग्रकेसरविषयमपि कृतं शिखाभरणम्[5]।।**

अत्राप्युदाहरणे पुरुरवसो विलापवाक्यस्य योजना पर्याप्तं मार्मिकी सहृदयसंवेदनापत्रीभूताऽस्ति। अत्र नायकः पुरुरवा रक्तकदम्बम् उपालभते। ग्रीष्मान्तस्य संकेतः अस्य रक्तकदम्बस्य पुष्पैर्विज्ञायते। अस्यैव पुष्पं कदाचित् उर्वश्या धृतम्। तद्धि पुष्पमसमग्रकेसरशिखमासीत् अतएव न तत् तदीयकेशपाशाद् विशृंखलितम्। अनेन पूर्वस्मृत्या पुरुरवा उर्वश्यां रक्तकदम्बपुष्पधारणमन्वेषणहेतुत्वेन दर्शयति। अत्रापि रक्तकदम्बपुष्पधारणकालिक्या अवस्थायाश्चित्रणं सहृदयाह्लादकत्वात् प्रकृतविप्रलम्भशृङ्गाररसानुकूलतया च नितान्तमौचित्यावहं विज्ञातव्यम्।

अथान्यत्रापि अस्मिन्नेवाङ्के उर्वश्याः कादाचित्कीम् क्रुद्धावस्थां वर्णयति पुरूरवस उक्तौ कालिदासः। यथा –

**'तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः,**
**शून्यैवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा।**
**चित्तं मौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते,**
**चण्डी मामवधूय पादपतितं जातानुतापेव सा[6]।।'**

उदाहरणेऽस्मिन् कुसुमरहिताया लताया दर्शनाज्जायमानस्य अनुरागस्य विषये प्रवक्ति नायकः पुरुरवा। अस्मिन् वर्णने स्वप्रियाया उर्वश्या कोपनशीलाया अवस्थायाश्चित्रणं शठं नायकं प्रति नायिकाया कोपस्य सटीकप्रस्तुतेर्नितान्तमौचित्यावहमस्ति। तथा हि लतेयं कृशकायया उर्वश्या साम्यं बिभर्ति शरीरेण। अपि च चित्तं मौनमिवास्थितेति कथनेन कोपनान्ते गृहीतमौनावस्थाया निर्देशोऽप्यत्र लतायाः पक्षे उर्वश्याः पक्षे चोभयत्र पर्याप्तमौचित्यं लक्ष्यमाणमेवास्ति। 'चण्डी' शब्दस्य प्रयोगोऽपि अत्र अवस्थाविशेषस्यैवाभिव्यञ्जको वर्तते।

अथ रसौचित्यं प्रथमांके उर्वश्याः सौन्दर्यवर्णने प्रकटितपूर्वानुरागे यथा –

**अस्याः सर्वविधौ प्रजापतिरभूच्चन्द्रो न कान्तिप्रदः,**
**शृङ्गारैकरसः स्वयं नु मदनो मासो न पुष्पाकरः।**
**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो,**
**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः[7]।।**

उर्वश्याः ब्रह्मणा सृजनकाले केन केनोपमानेन किं किं शरीरावयव–विशेषमस्याः सृष्टमिति सन्दर्भे पुरुरवा कथयति यत् सम्भवतः चन्द्र एव अस्य सृजनार्थं ब्रह्मा बभूव यतो हि चन्द्र एव लौकिकसौन्दर्यस्य श्रेष्ठमुपमानमस्ति। कामः वसन्तश्चोभौ अस्याः शृङ्गारिकतां ससर्जतुः। पुराणस्य मुनेः नारायणस्य नास्या निर्माणे काचिद् भूमिका प्रतीयते विषयव्यावृत्तकौतूहलत्वात्। एवञ्चेत् चन्द्रमसा कामेन वसन्तेन च अस्या यन्निर्माणं कृतं

तन्मनोहरत्वात् सर्वथा प्रशस्यमित्यत्र नायिकाम् उर्वशीं प्रति नायकस्य पुरुरवसः रागातिशयेनाभिव्यञ्जितः शृङ्गाराख्यो रसः पूर्वानुरागजनने प्रासङ्गिकत्वादौचित्यमादधाति।

एवमेवान्यत्रापि –

**वाष्पायते निपतिता मम दृष्टिरस्मिन्,**
**वात्सल्यबन्धि हृदयं मनसः प्रसादः।**
**सञ्जातवेपथुभिरुज्झितधैर्यवृत्ति-**
**रिच्छामि चेन्नमदयं परिरब्धुमङ्गैः[8]।।**

उदाहरणपद्येऽस्मिन् पुत्रविषयकरतिस्थायिभावस्य विभावादिभिः परिपोषाद् वात्सल्याख्यो रस उपस्थापितो वर्तते महाकविना कालिदासेन। अत्र दृष्टः क्षत्रियकुमार आलम्बनविभावः, हृदये वात्सल्यानुभूतिः मनः प्रसादनं च उद्दीपनविभावौ। अश्रुसमुद्गमः अनुभावः। वेपथुः सञ्चारीभावः। धैर्यत्यागादधीरत्वादि व्यभिचारीभावश्च वर्तते। सर्व एते स्थायिनं पुष्णन्ति। आलिङ्गनेच्छा वात्सल्यातिशयस्याभिव्यञ्जिकैव। च्यवनाश्रमे तापस्या आनीतं बालकं प्रति वत्सलतया नैसर्गिकोऽयं वात्सल्यरसः प्रकृतानुयोगित्वान्नितान्त-मौचित्यावहः।

**अथ वाच्यौचित्यं यथा-**

**इदमसुलभवस्तुप्रार्थनादुर्निवारं**
**प्रथममपि मनो मे पञ्चबाणः क्षिणोति।**
**किमुत मलयवातोन्मूलिता पाण्डुपत्रै-**
**रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु[9]।**

अस्मिन्नुदाहरणे दुष्प्राप्यवस्तुनः प्रापणेच्छायाः पूर्वमेव कामदेवेन विनिवारणात् क्षुब्धमनसो नायकस्य दुरवस्था स्वयमेव नायकेनाभिव्यक्ता। सम्प्रति नायको मलयपवनेन वृक्षेभ्यः पाण्डुपत्राणामधोनिपतनं वीक्ष्य आम्रमञ्जरीणामेव स्फुटदर्शनात् मामकीना स्थितिः कीदृशी भवितेति सम्प्रवक्ति। वाच्योऽर्थोऽयं किमुत इति पदेन पूर्वापेक्षया मनसो वैकल्यातिशयं स्फुटं सूचयतीति तात्पर्यविशेषद्योतन-क्षमत्वात्पर्याप्तमौचित्यमावहति।

अथ अलंकारौचित्यं यथा –

**अयञ्च गगनात्कोऽपि तप्तचामीकराङ्गदः।**
**अवरोहति शैलाग्रं तडित्वानिव तोयदः[10]।।**

उदाहरणपद्येऽत्र रथवेगेनावतरमाणस्य कस्यचित्पर्वताग्रे जायमानाद् ध्वनिविशेषात् तडिद्युक्तेन मेघेन साम्यमुपकल्प-यति। तप्तचामीकराङ्गदे तोयदे च वर्णसादृश्यं तडित्वानित्यनेन च अवरोहणकालिकं ध्वनिसादृश्यं प्रतीयते। इव वाचकपदेन सादृश्योपलक्षणादत्र प्रयुक्त उपमालङ्कारः सर्वथा सार्थकोऽस्ति यतो हि अवतरमाणोऽयं गन्धर्वराजश्चित्ररथो वस्तुतो विशेषध्वनिना च तादृशं गाम्भीर्यमाददाति स्म। अतएवास्योपमालङ्कारस्य प्रकृतवर्णने औचित्यं लक्ष्यते।

एवमन्यत्रापि –

**उदयगूढशशाङ्कमरीचिभि-**
**स्तमसि दूरतरं प्रतिसारिते।**
**अलकसंयमनादिव लोचने**
**हरति मे हरिवाहनदिङ्मुखम्[11]।।**

अस्मिन्नुदाहरणे प्राच्या दिशो मुखं मम नेत्रे आकर्षतीति कथने अलकसंयमनस्य सम्भावनायाम् उदयाचले गूढस्य चन्द्रमसो मरीचिभिस्तमोऽपसारणेन सादृश्यमुपकल्पित-मस्ति। तेनोत्प्रेक्षालङ्कारोऽत्र विद्यते। अयं हि उत्प्रेक्षालंकारः गूढशशाङ्कमरीचीनां तमोऽपसारणरूपकार्ये ह्यलकसंयमनाद् दिङ्मुखस्यौज्ज्वल्यातिशये व्यञ्जकोऽस्ति। एवं प्रकृतार्थज्ञापने हेतुतयाऽस्य उत्प्रेक्षालङ्कारस्यौचित्यं वर्णनेऽत्र स्वत एव लक्षितं भवति।

अथ गुणौचित्यं यथा द्वितीयाङ्के –

**निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दीं च लासयन्।**
**स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे[12]।।**

उदाहरणेऽस्मिन् असमस्तपदानामाधिक्येन प्रयोगात् अल्पसमासपदस्य सकृदेव प्रयोगात् प्रचलितपदानामेव च योजनया झग्त्यिर्थप्रतीतेः प्रसादगुणः सम्प्रयुक्तोऽस्ति। वायोः कृते 'दक्षिण' शब्दस्य प्रयोगे गूढतात्पर्यबोधाय कविना प्रसादयुक्तया प्राञ्जलपदावल्यैव तत्कार्यं संसाधितमिति प्रसादस्यौचित्यमत्र स्वत एव स्पष्टीभवति।

**अन्यत्राप्येवम् –**

**एषा मनो मे प्रसभं शरीरात्**
**पितुः पदं मध्यममुत्पतन्ती।**
**सुराङ्गना कर्षति खण्डिताग्रात्**
**सूत्रं मृणालादिव राजहंसी [13]।।**

उदाहरणेऽत्र लालित्यं नाम गुणः पदविन्यासे स्फुटं

विद्योतते। प्रकृतार्थद्योतने सम्प्रयुक्तस्योपमालंकारस्य साहचर्येण पदलालित्यमिदं सहृदयहृदयाह्लादकत्वादौचित्या-वहं विज्ञेयम्। प्रसादस्य साहचर्येण झगित्यर्थविज्ञापकत्व-मप्यत्र विन्यस्तेषु पदेषु अर्थगतं चारुत्वमावहति।

**अथ वाचकौचित्यं यथा-**

**आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।**
**उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः**[14] **।।**

अत्रास्मिन्नुदाहरणे नायिकाया उर्वश्या सौन्दर्यातिशयद्यो-तनाय उपमानोपमेययोरेकस्मिन्नेव पदार्थे कथनं वाचक-शब्दैर्विहितम्। आभरण-प्रसाधन-उपमानशब्दा वाचका हि अत्र व्यतिरेकालंकारं द्योतयित्वा तात्पर्यविशेषद्योतनक्षमाः वर्तन्ते। तस्माद् वाचकौचित्यमत्र स्फुटं विज्ञातव्यम्।

**अथ प्रबन्धार्थौचित्यं यथा -**

**हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा,**
**कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्।**
**न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां,**
**मम नयनयोरुद्बाष्पं सखे न भविष्यति**[15] **।**

उदाहरणपद्येऽस्मिन् भयधैर्ययोरुभयोरेव सम्भावनाम् अपाकर्त्तुं नायकः पुरुरवा चित्रनिर्मितिविषयं प्रस्तौति स्वकीयकथने। अत्र मूलतः चतुर्णां वाक्यानां योजना वर्तते। तत्राद्यं हृदयस्य कामशल्येन विद्धतारूपमर्थं सूचयति, द्वितीयं स्वप्नसमागमेन निद्राया अलाभरूपमर्थं सूचयति, तृतीयं चित्रीकरणेऽपि तत्पूर्त्यभावरूपमर्थं सूचयति। चतुर्थं च नयनयोरश्रुसमुद्गमरूपमर्थं सूचयति। एवं चतुर्णां वाक्यानां ये अर्थास्ते सर्वे चित्रदर्शनेऽपि अपूर्णतया नायिकाया अभावरूपेऽर्थे एव तात्पर्यत्वेन सन्निहिताः सन्ति। तेनात्र प्रबन्धार्थौचित्यं स्फुटमुपलक्ष्यते।

**अथान्यत्रापि-**

**वासार्थं हरसम्भृतं सुरभि यत्पौष्पं रजो वीरुधां,**
**किं मिथ्या भवतो हृतेन दयितास्नेहस्वहस्तेन मे।**
**जानीते हि भवान् विनोदनशतैरेवंविधैर्धारितं,**
**कामार्त्तं जनमञ्जसाभिभवितुं नालम्बितप्रार्थनम्**[16] **।।**

अस्मिन्नप्युदाहरणे मलयानिलं सम्बोध्य नायकः पुरुरवा विप्रलम्भकालिककामोद्दीपनानां प्रस्तुतिसन्दर्भे तमुपालभते। अत्रापि वाक्यचतुष्टयं योजितं वर्तते महाकविना कालिदासेन तदुक्तौ। तत्र लतानां गन्धितः पुष्परागः स्वनिवासाय नयेति प्रथमवाक्यार्थः। मिथ्यैव मे दयितास्नेहस्वहस्तेन हृतेन भवतः किं विशिष्टं लाभादिसम्भाव्यम् अर्थात् नैव त्वदीयः तेन कश्चिल्लाभ इति द्वितीयवाक्यार्थः। विनोदस्य शतश उपायान् भवान् सम्यग् जानाति इति तृतीयवाक्यार्थः। कामिजनस्य निपीडनाय प्रार्थनीयास्तद्विहिताया आलम्बनमपि नास्ति त्वया सम्भवमिति चतुर्थवाक्यार्थः। चतुर्णामेषां वाक्यार्थानां न मलयानिलस्तव कामपीडनोपशान्तिं विधातुं शक्नोतीत्ये-कस्मिन्नेव तात्पर्ये पर्यवसानादत्र प्रबन्धार्थौचित्यं स्वीकार्यमेव।

**अथ कालौचित्यं** यथाऽत्रैव विक्रमोर्वशीये द्वितीयाङ्के ग्रीष्मर्त्तुवर्णनप्रसङ्गे -

**उष्णार्त्तः शिशिरे निषीदति तरोर्मूलालवाले शिखी,**
**निर्भिद्योपरि कर्णिकारमुकुलान्याशेरते षट्पदाः।**
**तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते,**
**क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते**[17] **।।**

उदाहरणपद्येऽस्मिन् ग्रीष्मवर्णनमुपनिबद्धं महाकविना कालिदासेन। स्नानयोग्यत्वं भोजनयोग्यत्वं च निर्देष्टुं ग्रीष्मस्य असह्यतायाश्चित्रणमत्र नितान्तमौचित्यावहम्। तरुमूले स्थितस्य शिखिनः स्थितिः ग्रीष्मार्त्ततया तं प्रति संवेदनां जनयति। एवमेव कर्णिकारमुकुलेषु षट्पदानां शयनमपि मुकुल-विदीर्णतया संवेदनशीलतां जागर्त्ति।

कारण्डवेन वारिपरित्यागो नलिनीसेवनं चापि ग्रीष्मतापापकरणाय युज्यते। पञ्जरशुकस्य क्रन्दनम् अपि ग्रीष्मजन्यां पिपासां सूचयति। अत्र सर्वेषामेतेषां वाक्यार्थानां मूललक्ष्यं ग्रीष्मकालस्य असह्यताद्योतनमेवास्ति। विप्रलम्भे कामपीडया असह्यतया समानान्तरममुष्य युज्यमानतया औचित्यं स्वीकार्यमेव।

**अथाभिप्रायौचित्यम् -**

**कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण।**
**अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या**[18] **।।**

अस्मिन्नुदाहरणपद्ये विप्रलम्भमुपगतो नायकः पुरुरवा स्वकीयं दिवसकालव्यपगमनविषये प्रवक्ति यत् दिवसे कार्यान्तराणां बाहुल्यात् सर्वः समयो मया यथाकथञ्चित् व्यपगमितः किन्तु रात्रिस्तु दीर्घयामा प्रतीयते तस्या विनोदसाधनानामप्यभावः। अतएव रात्रिकालव्यपगमनं नास्ति

सहजं सुकरं वेत्यभिप्रायोऽत्र पुरुरवसो वाक्ये विप्रलम्भानुयोगित्वात् मार्मिकतायां सहकारित्वाच्च पर्याप्तमौचित्यपूर्णः परिलक्ष्यते।

**अथ रीत्यौचित्यम् -**

**विद्युल्लेखा कनकरुचिरं श्रीवितानं ममाभ्रं,**
**व्याधूयन्तं निचुलतरुभिर्मञ्जरी चामराणि।**
**घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठाः**
**धारासारोपनयनपरा नैगमाः सानुमन्तः[19]।।**

उदाहरणपद्येऽत्र महाकविः कालिदासः वर्षाकालकलक्षणैर्नायकस्य पुरुरवसो राजसिकं व्यवहारं निरूपयति। वर्णनेऽत्र द्वित्रिपदायाः पाञ्चाल्या उपस्थापनं तेन विहितम्। यद्यपि महाकविरसौ सर्वत्र वैदर्भी समाश्रयते तथाप्यत्र इतःपूर्वं ग्रीष्मस्य वर्षर्तोः तत्प्रशामकत्वादिव विप्रलम्भजन्यकष्टोपशान्त्यै इदं वर्णनमुपनिबध्नाति। प्रकृतप्रसंगानुयोगित्वादत्र प्रयुक्ता पाञ्चाली नितान्तमौचित्यावहा प्रतीयते।

**अन्यत्राप्येवम् -**

**रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं,**
**नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः।**
**उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-**
**स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः[20]।।**

अस्मिन्नप्युदाहरणे प्रियाया उर्वश्या वियोगेन सन्तप्तो नायकः पुरुरवा विलपमानो रक्ताशोकं पृच्छति यन्मे प्रियतमा क्व गतेति। अत्र अशोकमुपालभमानस्य नायकस्य कथने महाकविना सम्प्रयुक्ता वैदर्भी पूर्ववर्त्तिनि चरणद्वये स्वकृतानुमानसार्थक्याय परमोपयोगिनी वर्तते। अग्रे तृतीयचरणे दीर्घसमासे गौड्याः प्रयोग ओजोव्यंजकवर्ण-योजनया स्पष्टमेव। नायकस्य क्रोधं सम्यग् अभिव्यञ्जयितुं महाकवेरत्र प्रयुक्ता गौडी प्रकृते गृहीताया वैदर्भ्या एव सहायिका अस्ति एवं चात्र प्रयुक्तं रीतिसाङ्कर्यं प्रकृतार्थानुयोगित्वात्परमौचित्यमादधाति।

**अथ देशौचित्यं यथा -**

**पद्भ्यां स्पृशेद् वसुमतीं यदि सा मृगाक्षी,**
**मेघाभिवृष्टिसिकतासु वनस्थलीषु।**
**पश्चान्नता गुरुनितम्बतया ततोऽस्याः**
**दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का[21]।**

उदाहरणपद्येऽस्मिन् प्रियाया उर्वश्या वियोगे विलापं कुर्वन् नायकः पुरुरवा तस्या गमनमार्गस्यान्वेषणं विषयीकृत्य वनस्थल्या वर्णनं प्रस्तौति। अत्र वनस्थली मेघवर्षणेन आर्द्रसिकतामयी आसीत्। तत्र गमने गुरुतरनितम्बायास्तस्या पदचिह्नानाम् अङ्कनमवश्यमेव उपलक्ष्यमाणं भवेदित्याशंकां स अभिव्यनक्ति। अत्र वनस्थल्यां सिकतामयप्रदेशस्य औचित्यं पदचिह्नाङ्कनदृष्ट्या स्पष्टमेव प्रतीयमानम् अस्ति।

**अथ स्वभावौचित्यं यथा -**

**त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः।**
**सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा[22]।।**

अत्रास्मिन्नुदाहरणे स्वभावानुरूपमेव प्राणिनः कार्यप्रवृत्तिरुदाहृता। तत्र च प्रासङ्गिकतया सूर्यस्य अग्नेश्च स्वभावेन मिथस्तेजोवृद्धिः प्रतिपादिता। उर्वशीपुरुरवसोर्भाविनि काले मिलनाभावेऽपि परस्परं प्रणयसंवर्धनं सूचयित्वा कुमारस्यायुषोऽपि यौवराज्याभिषेके पितापुत्र-योरुभयोर्मिथः राजशक्तिसमृद्धिः सन्दर्शिता। अत्र कार्यस्यास्य मूले स्वभावस्य नैष्ठिकतया औचित्यं स्पष्टमेव।

एवं महाकविकालिदासविरचिते विक्रमोर्वशीये नाटके औचित्यतत्त्वस्यानुपालनम् इतरशास्त्रीयतत्त्वानां विन्यासस्य मूले सर्वत्र द्रष्टव्यमस्ति। औचित्यमूलकत्वादेव तत्कृत-वर्णनानां सार्थक्यं स्फुटं प्रतीयते। तस्मादेव चायं महाकवि-स्तत्कृतिश्चेयं सर्वथा प्रशस्या।

**शोधच्छात्रा, ज.रा.रा.संस्कृतविश्वविद्यालय, जयपुर**

**सन्दर्भग्रन्थसूची -**

1 विक्रमोर्वशीयम् - १/४, 2 विक्रमोर्वशीयम् - ४/२२, 3 विक्रमोर्वशीयम् - ४/३४, 4 विक्रमोर्वशीयम् - ४/५२, 5 विक्रमोर्वशीयम् - ४/६१, 6 विक्रमोर्वशीयम् - ४/६८, 7 विक्रमोर्वशीयम् - १/१०, 8 विक्रमोर्वशीयम् - ५/९, 9 विक्रमोर्वशीयम् - २/६, 10 विक्रमोर्वशीयम् - १/१५, 11 विक्रमोर्वशीयम् - ३/६, 12 विक्रमोर्वशीयम् - २/४, 13 विक्रमोर्वशीयम् - १/२०, 14 विक्रमोर्वशीयम् - २/३, 15 विक्रमोर्वशीयम् - २/१०, 16 विक्रमोर्वशीयम् - २/१९, 17 विक्रमोर्वशीयम् - २/२२, 18 विक्रमोर्वशीयम् - ३/४, 19 विक्रमोर्वशीयम् - ४/१३, 20 विक्रमोर्वशीयम् - ४/६२, 21 विक्रमोर्वशीयम् - ४/१६, 22 विक्रमोर्वशीयम् - ५/२०

# ग्रहवेधः वेधशालापरिचयश्च

❑ विनोदकुमारशर्मा



वेधशालापरिचयात्प्रागिह वेधपदार्थः परिचीयते। वेध-शब्दः विध् धातुना निष्पद्यते। भिद्यतेऽनेनेति वेध इति लौकिकविग्रहानुगुणं वेधपदार्थः भवति। ''वेधनम्'' ''छिद्राङ्करणम्'',''छिद्रः'',''गर्तः'',समयस्य मापको वा।

वेधशब्दप्रयोगः प्रायेण ग्रहशब्देन सह लक्ष्यशब्देन च सह दृश्यते, यथा ग्रहवेधः लक्ष्यवेधश्च। यावन्न प्राप्यते लक्ष्यं तावत्तत्पृष्ठे सततमवधानेन तत्भेदनमेव लक्ष्यवेधो भवति। एवमेव यावन्न सिध्यते प्रयोजन ग्रहदर्शनमेव ग्रहवेधः। सततं ग्रहदर्शनेनैव ग्रहाणामुदयास्तयोः समयं जज्ञिरे महर्षयः। अत एवात्र वेधशब्दः ''समयमापकः'' सिद्धो भवति। खेटानामुदयास्तसमयं विज्ञाय कस्यचिल्लौकिकलक्ष्यवेध-कारणात् वेधशब्दः''वेधनम्''इत्यर्थेऽपि प्रयुज्यते।

गगनगानां ग्रहबिम्बानां, तारापुञ्जानां, नक्षत्रनीहारिकाणां वा सामान्यतया नग्नदृष्ट्या दर्शनम् ''अवलोकनं'' कथ्यते। इदमेवावलोकनं यदि कस्मैचिदुद्देश्याय प्रयोजनसिद्ध्यै वा नित्यं क्रियते चेत् ''प्रेक्षणम्'' उच्यते। प्रेक्षणमिदं यदि केनचित् यन्त्रेणाहोस्वित् कयाचित् यष्ट्या शलाकया वा क्रियते चेदियं दर्शनक्रिया ''वेध'' नाम्नाऽभिधीयते। प्रेक्षणमिति पदे प्रकर्षेण ईक्षणमिति विग्रहकारणात् यन्त्रैः ग्रहदर्शनं प्रेक्षणं भवति, यतोहि यन्त्राणि यादृक् प्रकर्षत्वं जनयन्ति न हि तादृक् प्रकर्षत्वं यष्टिशलाकादिभिः जन्यते। अतः प्रेक्षणं नाम सूक्ष्मातिसूक्ष्मयन्त्रैः ग्रहबिम्बानां दर्शनमिति। वेध इत्यत्र भिद्यतेऽनेनेति वेध इति व्युत्पत्या करणकारकत्वात् केनापि पदार्थसाहाय्येन खेटानामवलोकनमिति वेधः। एवं वेधे चोभयत्रापि दर्शनक्रिया त्वस्त्येव,परन्तु प्रेक्षणे प्रकर्षेण दर्शनं भवति, वेधे च बिम्बानां नग्नदृष्टिवदेव सामान्येन दर्शनं भवति।''प्रकर्षेण दर्शनं'' इत्यत्र पदद्वयमस्ति, प्रथमं प्रकर्षणं द्वितीयञ्च दर्शनमिति। एवमेव सामान्येन दर्शनमित्यत्रापि पदद्वयं विद्यते। प्रथमं तावत् सामान्यं दर्शनमिति द्वितीयञ्च अत्र यदि जहदजहल्लक्षणया प्रकर्षणसामान्यपदे त्यजामश्चेत् दर्शनमवशिष्यते। अतः प्रेक्षणवेधशब्दौ तुल्यावेव, दर्शनक्रियायारुभयत्र समन्वयात्। यद्यपि वेधप्रेक्षणशब्दौ कथमपि तुल्यौ भवितुं नार्हतः, प्रकृतिप्रत्ययधात्वलौकिक-लौकिकविग्रहवैचित्र्यात्। तथापि शब्दद्वयमपि दर्शनक्रियामेव सूचयतः। अतोऽर्थात्तुल्योभौ वेधप्रेक्षणशब्दौ भवतः।

अयं वेधशब्द एवाङ्गलभाषायां "OBSERVATION" इति कथ्यते। अयमपि शब्दः वेधशब्देन सम्बन्धितः। OXFORD शब्दकोशानुसारेण Watch (some or something) carefully and attentively इति OBSERVATION शब्दार्थः भवति। अत एव वेध OBSERVATION शब्दयोः सम्बन्धो वर्तते। अत्रोभयोरपि शब्दयोः शब्दशः सम्बन्धस्तु कथमपि भवितुं नार्हति, भिन्न-भाषाधर्मात्। परन्तु द्वयोरप्यर्थौ तुल्यावतः अर्थेनात्र सम्बन्धः वर्तते। इत्ययं वेधपरिचयः, तन्निर्वचनानि च पद्यैः लिख्यन्ते –

**नग्नदृष्ट्या हि खेटानां दर्शनं त्ववलोकनम्।**
**दर्शनं यन्त्रद्वारा च वेधनाम्नाऽभिधीयते।।**

**ग्रहनक्षत्रताराणां सप्रयोजनमीक्षणम्।**
**नित्यं यदि क्रियते चेत् ''प्रेक्षणं'' तद्धि उच्यते।।**

**प्रेक्षणं दृष्टिवेधश्च तुल्यार्थबोधकाविमौ।**
**योगरूढ्या प्रयुज्येते योगरूढाविमौ ततः।।**
**ओब्जरवेशन शब्दस्य तथा प्रेक्षणवेधयोः।**
**समानार्थाः हि वर्तन्ते ज्ञायन्तेऽर्थबलाद्धि ते।।**

**वेधशालापरिचयः**

यस्मात्स्थानात् स्वस्थबिम्बानां नित्यं वेधः कर्तुं शक्यते तत्स्थानं वेधशाला नाम्नाऽवबोध्यते। वेधशालाया अपरं नाम ''यन्त्रालयः।'' वेधार्थं प्रयुज्यमानयन्त्राणां आलयो स्थानं वा यन्त्रालयः। अयं यन्त्रालय एव ''जन्तरमन्तर'' शब्देन संज्ञायते। वस्तुतः जन्तरमन्तर इति पदे ''यन्त्र मन्दिरं'' इति निक्षिप्तशब्दौ स्तः। यन्त्रमन्दिरमिति कथनेन यन्त्रगेहं बुद्धौ समायाति। आधुनिकविज्ञानयुगे यन्त्राणां प्रचारत्वात् सर्वविधयन्त्राणां निक्षेपस्थानं यन्त्रमन्दिरं स्यात्, परन्तु सप्तदशशताब्दौ ग्रहवेधप्रयुज्यमानयन्त्रगेहमेव यन्त्रमन्दिरं भवति स्म। यन्त्रमन्दिरमेव ''जन्तरमन्तर'' इति कालान्तरे परावर्तत। अयं जन्तरमन्तरशब्दः रूढः सञ्जातः सन्सम्प्रति वेधशालार्थे एव प्रयुज्यते।

वेधशालैवाङ्गलशास्त्रे OBSERVATORY नाम्ना ज्ञायते। OBSERVATORY शब्दः OBSERVAT-ORY शब्देन सम्बन्धितोऽस्ति। OBSERVATION नाम सम्मुखं विद्यमानवस्तुनः समन्तादवलोकनमाहोस्वित् ग्रहनक्षत्रताराणां सप्रयोजनमीक्षणं OBSERVATION, OBSERVA-TION स्थानं OBSERVATORY प्रथितमेव। भवतु नाम, इमे समेऽपि (यन्त्रालयः, वेधशाला, ओब्जर्वेट्री) शब्दाः पृथक्-पृथक् सन्तोऽपि तुल्यार्थस्यैव द्योतकाः सन्ति। इदमेव पद्येन सूच्यते -

**यन्त्रालयो वाऽपि च वेधशाला,**
**ओब्जर्वेट्री खल्वाङ्गलशास्त्रे।**
**कालान्तरे जन्तरमन्तरञ्च**
**समं ह्यर्थममी द्योतयन्ति।।**

शोधच्छात्रः, राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसरः

**संस्कृतसमाचारः**

# भारतार्थं पदयात्रा (MARCH FOR INDIA)

**डॉ. हर्षदेवमाधव**

नवम्बरमासस्य सप्तम्यां तारिकायाम् अनुपमखेर-शेखरकपूर-वासुदेव कामथमधुरभांडारकर-मनोजजोशी-इत्यादीनां प्रमुखानां कलाकाराणां नेतृत्वे नवदिल्यां 'भारतार्थं पदयात्रा' याः (MARCH FOR INDIA) आयोजनमभवत्। अस्मिन् अवसरे आयोजिते सम्वादे डॉ. हर्षदेवमाधव-डॉ. विजयपण्ड्या-डॉ. मिथिलाप्रसाद त्रिपाठि प्रभृतयः संस्कृतसाहित्यकारा अपि उपस्थिता आसन्। तैः सर्वैः पुरस्कारप्रत्यर्पणनाटके निहितं निगूढं सत्यं निरूपितम्। ये साहित्यकाराः कलाकाराश्च पुरस्कारान् प्रत्यर्पयन्ति, तैः अतीते नैकासु घटनासु मौनमाश्रितम्। काश्मीरीपण्डितानां हत्या स्वजन्मभूम्यास्तेषां निष्कासनम्, दिल्लीनगर्यां सिक्खानां हत्याकाण्डः, गोधरा-रेलयानदाहघटना-मुम्बापूर्यां बॉम्बस्फोटादीनां नैकानां घटनानामवसरे ते धृतराष्ट्रतां गता आसन्। अधुना तथाकथिताः साहित्यकाराः कलाकाराश्च यद् भारतस्य भव्यं दीप्तिमच्चित्रं विश्वस्मिन्नपि विश्वे वर्तमानमस्ति, तत् मलिनीकर्तुं राजनीतिमाश्रित्य प्रयतन्ते तन्न योग्यम्। हर्षदेवमाधवेन संस्कृतवार्ताहरेभ्यो दूरदर्शनसंवाददातृभ्यः कथितं यत् साहित्याकादमीप्रभृतयः संस्थाः सर्जकेभ्यः प्रोत्साहनदात्र्यः सन्ति। पुरस्कारचयने साहित्यकारा आसन् ताटस्थ्येन निर्णायकैर्निर्णया दत्ताः। जनतासमक्षं पुरस्कारान् स्वीकृत्य प्रत्यर्पणं वस्तुतो राष्ट्रस्य, राज्यस्य, साहित्यकाराणाम्, संस्कृतेः समाजस्य घोरापमानमस्ति। वाणीस्वातन्त्र्येऽपि संयम- ताटस्थ्य-राष्ट्रभक्ति-मानवधर्मादयो गुणाः आवश्यकाः सन्ति। भारतस्य गौरवं खण्डयितुम्, भारतस्य संस्कृतिं दूषयितुम् पुरस्कारप्रत्यर्पणकारिणां मलिना मानसिकता सर्वथा निन्दनीयाऽस्ति। पञ्चसहस्र-संख्याका जना भारतार्थं पदयात्रां कर्तुं समागताः, तैः 'इन्डियागेट' तो राष्ट्रपतिभवनं यावद् गत्वा राष्ट्रपतये आवेदनपत्रं दत्तम्।

ग्रन्थसमीक्षणम्

# घटकर्परकाव्यं तट्टीकाश्च

❑ देवर्षिकलानाथशास्त्री

सुविख्यातमेव संस्कृतजगति ''घटकर्पर'' काव्यं, नीतिसारश्च। कोऽयं महान् कविरभूद् घटकर्परनामा, कुत्राऽभूदिति तु रहस्यगर्भे तिरोहितमेव। बहव एनं सन्देशकाव्यरचयितारं मन्यन्ते, बहवो नीतिकाव्यरचयितारम्। अलङ्कृतशैल्या प्रणीता प्राञ्जल-हृदयावर्जक काव्य-रचनाऽस्य शताब्दीभ्यो जनमनोमोहिनी वर्तत इति तु स्पष्टमेव यतोऽयं यमकालङ्कारविशेषज्ञोऽभूत्।

**सतडिज्जलदार्पितं नगेषु स्वनदम्भोधरभीतपन्नगेषु।**
**परिधीर-रवं जलं दरीषु निपतत्यद्भुतरूपसुन्दरीषु।। (4)**

इत्यादिभिः पद्यैरनेन प्रकृतिवर्णनमपि कृतं, नीतिवर्णनमपि। यमकाधिपतिनानने घोषितमभूद् यद् यमकालङ्कारे यदि कश्चनाऽन्य एनमतिशेते तर्हि तस्याऽयं दासो भविष्यतीति-

**भावाऽनुरक्तवनितासुरतैः शपेयम्,**
**आलभ्य चाऽम्बु तृषितः करकोशपेयम्।**
**जीयेय येन कविना यमकैः परेण,**
**तस्मै वहेयमुदकं घटखर्परेण।।22।।**

यदि यमकप्रयोगे केनचनाऽयं विजितः स्यात्तर्हि तस्य भृत्यत्वेन घटखर्परैरयं तस्मै जलमाहरिष्यतीति स्वकीयकाव्यस्यान्तिमे पद्येऽयं घोषयति। अत एवाऽस्य नाम घटखर्परः (अथवा घटकर्परः) इति प्रथितमित्यपि मन्यते किन्तु न कश्चनाऽन्यः परिचयोऽस्य कुत्राऽपि प्राप्यते। इतिहासकाराः सूचयन्ति यदाचार्याभिनवगुप्तपादेन घटकर्परकाव्योपरि काचन टीका व्यलेखि, तदनन्तरमेतन्नाम प्रथितमभूत्। तन्नाम ''घटखर्पर'' इत्यभूदथवा घटकर्पर इत्यपि न ज्ञायते। **''धन्वन्तरिक्षपणकामरसिंह शङ्कुवेतालभट्टघटकर्पर-कालिदासाः।ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।''** इति सुप्रचलिते पद्ये विक्रमादित्यस्य येषां नवरत्नानां नामान्युल्लिखितानि तेषु घटखर्परोऽप्यस्तीत्ययं विक्रमसमकालिकः स्यादिति कतिपयेषां कथनम्, किन्तु तन्नानुमोद्यते इतिहासकारैर्यतोऽस्मिन् पद्ये सुदूरकालजातानां बहूनां नामान्येकत्र सङ्कलितानि, अन्तो नेदं प्रामाणिकमिति स्पष्टमेव। अनेन केवलमिदं स्पष्टीभवति यद् घटखर्परो विख्यातः कविरासीत्।

घटखर्परकाव्यरूपेण सत् साहित्यमुपलभ्यते तत्र प्रमुखं प्रौढं च काव्यमस्ति यमकालङ्कारबद्धानां केवलं 22 पद्यानां सङ्ग्रहरूपं काव्यं यच्छताब्दीभ्यः सुप्रथितम्। अन्यदेकं नीतिसारनामकं पद्यसङ्कलनमप्यस्ति यस्य बहवः श्लोकाः सुप्रथिता विद्वत्सु यथा-''उद्योगिनं पुरुषसिंहमुपैतिलक्ष्मीः।'' अथवा''अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः।''

काव्यद्वयमिदमतिरिच्य नाऽन्या काचन कृतिरस्य प्रसृता समुपलभ्यते। एतद्विषये किंवदन्त्यस्तु सुभृशं प्रचलिताः सन्ति। बहवः कालिदासस्यैवेदमपरं नामेति साधयन्ति, किन्त्वितिहासलेखका नेदं मन्यन्ते। तेषां स्थापनाऽस्ति यद् घटखर्पराख्यः कश्चन विशिष्टः कविरवश्यमभूत्, तस्य च कालोऽभिनवगुप्तकालात् पूर्वं स्यात्। एतस्य नीतिपद्यानि विद्वत्समाजे महतीं प्रतिष्ठां प्रापुरित्युपरि प्रस्तुतेनाभिप्रायेण स्पष्टीभवत्येव किन्त्वेतस्यालङ्कृतं यमककाव्यमपि सुप्रसिद्धमभूद् विद्वत्समाजे। ये केचनेदं ''सन्देशकाव्यं'' व्यपदिशन्ति (संस्कृत साहित्य का इतिहास पुस्तक लेखकाः) ते तु नैनं जानन्तीत्येव प्रतीयते यदेतस्य यमकबद्धेषु 22 पद्येषु सन्देशकाव्यत्वं न दृश्यते।

अचिरमेव मुम्बईस्थैः सकलशास्त्रविचक्षणैः श्रीमद्-वल्लभाचार्यवंशावतंसैः विद्वन्मूर्धन्यैः श्रीश्याममनोहर-गोस्वामिवर्यैरहं सूचितो यद् घटकर्परकाव्यस्य मूलपाठसहिता वैदुष्यपूर्णैका टीका दुर्लभग्रन्थसङ्ग्रहादेकस्मात् तैरुप-लब्धाऽस्ति या विलक्षणशेमुषीधनैरखिलशास्त्रपारङ्गतैः सुप्रथितैर्मनीषिभिः शतावधानिभिः कथावाचस्पतिभिः प्रज्ञाचक्षुष्ट्वे सत्यप्यद्भुतकृतित्वस्वामिभिः ''गट्टूलालाजी-'' तिलौकिकनाम्ना ख्यातैराचार्यश्रीगोवर्धनशर्मपादैर्विलिखिता-ऽस्ति। श्रीश्याममनोहराचार्यैरस्याष्टीकायाः पाण्डुलिपिरपि कृपापूर्वकं प्रहिता मह्यं या पाण्डुलिपिरपि कथयितुं शक्यते, ''लिथो'' प्रक्रियया मुद्रितस्य हस्तलिपिरूपस्य छायाप्रतिरपि। अत्र घटखर्परस्य सुप्रथितानां 22 यमकबद्धानां पद्यानां वैदुष्यपूर्णा विस्तृता चन्द्रिकानाम्नी टीकाऽस्ति। यथा पुरा गाथासप्तशत्यादीनां टीकाकारैरपि क्रियते स्म, प्रकृतिवर्णनपराणामपि पद्यानां

व्याख्यानाय अलङ्कारशास्त्र-विधानस्य योजनायै तेषामपि नायकनायिकाभेदविवरणपूर्वकं, विभावानुभावविश्लेषणाया-लम्बनोद्दीपनादियोजनां तेषु यथावद् विधाय नायिकाया उक्तिं वा तां संसाध्य तादृशी व्याख्या विद्वत्प्रवरेण टीकाकारेणाऽत्र प्रायः सर्वेषु पद्येषु विहिताऽस्ति। सेयं पाण्डुलिपिः शुद्धाऽस्ति अतोऽस्याः प्रकाशनं यथावदचिरमेव सम्पद्येतेति प्रयतिष्यामहे।

अस्मिन्नेव प्रसङ्गे गोस्वामिश्रीश्याममनोहराचार्यैरिदमपि सूचितं यद् बहुषु प्राचीनपाण्डुलिपिसङ्ग्रहेषु घटखर्पर-काव्यस्य टीकाः संगृहीताः सन्ति। तैर्जयपुरमहाराजप्रासादस्थे सवाई मानसिंह-म्यूजियमस्याङ्गभूते पाण्डुलिपिसंग्रहेऽपि (पोथीखाना इत्याख्ये) पाण्डुलिपयो दृष्टा अभूवन्। तेषां सूचनानुसारं मयाऽपि विद्वद्वर्यस्य पं. श्रीगोपालनारायण बहुरा महाभागस्य शोधग्रन्थे (आम्बेर-जयपुरधराधीशानां साहित्यिकपरम्पराऽवदानविवेचके) समवलोकिता घटखर्परकाव्यपाण्डुलिपीनां सूचना। एका पाण्डुलिपिरास्ते कालिदासकृतस्य (तथाकथितस्य) घटखर्परकाव्यस्य (601), अपराऽपि कालिदासनाम्नैव (607)। टीकासहित घटखर्परकाव्यस्याऽपि पाण्डुलिपित्रयमत्र संग्रहीतम्। एका टीकाऽस्ति केदारभट्टरचिता बालबोधिनी (मन्ये नीतिसारस्येयं स्यात्), अन्या च विद्वत्प्रवरलक्ष्मीनिवासकृता 22 यमकबद्धपद्यानां विस्तृता टीका (318) एकाऽन्याऽपि टीकासहिता घटकर्परकाव्यपाण्डुलिपिरत्र संगृहीताऽस्ति। एवंविधाः पाण्डुलिपयो बहुत्र सहस्रशःस्युः।

इत्थं सुप्रथितस्य प्राञ्जलस्य मनोहरस्य चास्य काव्यस्य यशो गतशताब्दीषु सुतरां सर्वत्र प्रासरदिति स्पष्टं किन्तु पाठ्यक्रमेषु काव्यस्याऽस्य प्रवेशाऽभावादद्य संस्कृतस्नातका नैतद्विषये किमपि जानन्तीति यद्यनुभूयते, न तत्र कश्चिद् विस्मयः कार्यः। अत्र प्रसङ्गवशात्सर्वासामचिरात्समुद्गतानां घटनानां विवरणमिदं विदुषां प्रमोदाय मया प्रस्तुतमस्ति।

## ऋग्वेदो ध्वनिमुद्रितः

अनन्तपारः खल्वनादिनिधनाया वेदवाण्या महिमा। ऋग्वेदो हि मानवीयपुस्तकालयस्यादिमं पुस्तकम्, विश्वस्य सर्वप्रथमो ग्रन्थ इति संयुक्तराष्ट्रसंघीयया ''यूनेस्को'' इत्याख्यया संस्थयाऽपि घोषितचरम्। असीमज्ञानराशेः सर्वप्रथममवतरणमृग्वेदे एव द्रष्टुं शक्यते इति सुविदितमेव। अत एव सहस्राब्दीभ्यः ऋग्वेदस्य पाठो गुरु-शिष्य-परम्पराऽनुग्रहेण भारतेऽस्मिन् सुरक्षितोऽस्ति।''मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह'' इत्यादिवचनैरिदमपि स्पष्टं यद् वेदवाण्याः सस्वरः शुद्धपाठ एव फलेग्रहिर्भवति। एवंविधस्य शुद्धपाठस्य परम्परा सर्वेषामपि वेदानां परिरक्षणाय घनपाठादिविकृतिपाठानां मार्गेण गुरुकुलेषु शताब्दीभ्यः परिपाल्यते इति देशस्यास्य सौभाग्यम्। ध्वनिमुद्रणस्य यान्त्रिकसाधनानि यदवधि प्रादुरभवन् तत आरभ्य वेदवाण्या विविधैः प्रकारैर्ध्वनिमुद्रणस्य (रिकार्डिंग) प्रयासा अप्यारभ्यन्त वेदवाग्विदग्धैः।

आन्ध्राञ्चलेषु हैदराबादस्थया वेदवाक्परिरक्षणपरया संस्थया, संस्कृतसंरक्षणपरया अकादम्या कृष्णयजुर्वेदपाठस्य ध्वनिमुद्रण- मकारीति वृत्तं कतिपयवर्षदशकपूर्ववर्ति। तिरुपतिदेवधाम्नि वेदवाचां ध्वनिमुद्रणकार्यक्रमः प्रचलतीत्यपि श्रुतमेव स्यात्संस्कृतसेवकैः। साम्प्रतं सर्वात्मना हृदयाह्लादकमिदं वृत्तमधिगम्य सुतरां हर्षगद्गदा भवेयुर्वेदवाक्सेवका यत्समग्रस्यापि ऋग्वेदस्य खिलसूक्तसहितस्य ध्वनिमुद्रणं कार्णाटीयेन विदुषा वेदश्री वेद-भूषणादिविरुदधारिणा डॉ. एस. रङ्गनाथेन कृतमस्ति यत् सान्द्रमुद्रिकायां (सी.डी.) निबद्धं बेंगलूरुतः सौविध्येन प्राप्तुं शक्यते।

बैंगलूरुस्थायाः आर.वी. इंस्टीट्यूट ऑफ संस्कृत स्टडीज इति संस्थाया निदेशकस्य श्रीरङ्गनाथस्येयं ध्वनिमुद्रिका सर्वेषामपि दशमण्डलानां सूक्तानि शुद्धपाठेन संगृह्णाति। 60 घण्टासमयव्यापी सोऽयं पाठः समग्रामपि ऋग्वेदसंहितामेकस्यां ध्वनिमुद्रिकायां संचिनोति, सारल्येन श्रोतुं श्रावयितुं च शक्यते इत्याधुनिकविज्ञानस्यापि चमत्कारोऽत्रान्तर्गर्भितोऽस्ति। आडियो सी.डी. ध्वनिमुद्रिकायामस्यां प्रारम्भे आंग्लभाषया वेदपरिचयः संक्षेपेण कारितः। तदनन्तरं वेदपाठो ध्वनिमुद्रितः। प्रो. रङ्गनाथः सुप्रथितो विद्वान् लेखकः, कविः विविधैः सम्मानोपाधिभिरलङ्कृतः सुविदितः संस्कृतजगति। विद्वद्वर्येणानेन प्रणीतायाः प्रसारितायाश्चास्य ध्वनिमुद्रिकाया अवतरणोपलक्ष्ये शतशो वर्धापनानि समर्प्यन्ते रङ्गनाथाचार्यवर्येभ्यः।

**ऋग्वेदसंहिताः** ऑडियो सी.डी. (डॉ. एस. रङ्गनाथ), ध्वनि-मुद्रणम् भूमिका स्टूडियो, बैंगलूरु

**सङ्केतः** - श्रीकौस्तुभः, 58 (203) वेस्टपार्क रोड़, मल्लेश्वरम्, बैंगलूरु 55 (मूल्यम् 499/-)

# शिक्षा-दर्शनम्

❑ ममता गुप्ता

शिक्षा कीदृशी स्यात्? एष प्रश्न: प्राक्कालादेव विचार-चिन्तन-विषय: 'सा शिक्षा या विमुक्तये' विद्ययाऽमृतमश्नुते, ऋते ज्ञानान् न मुक्ति:, सा शिक्षा या ब्रह्मगतिप्रदा इति।

इत्यत्र जितेन्द्रियत्वं सर्वोत्कृष्ट-गुण-सम्पन्नत्वं दुश्चरित्रादिवारणत्वं शिक्षाया उद्देश्यं निरूप्यते। यया जनानां सर्वाङ्गीणा समुन्नति: संजायते सा शिक्षा। एवं शिक्षाया: प्राचीनतमं रूपम् अथर्ववेदे प्राप्यते। तत्र शिक्षाया: स्वरूपं गुरुशिष्यसम्बन्धादिकं च विस्तरेण निरूपितमस्ति। अस्मिन् प्रसंगे तत्र ज्ञानसम्पन्नत्वस्य चिन्तनशक्तेश्च महत्त्वं प्रतिपाद्यते। शिक्षाया: परिभाषायां ज्ञानेन समं संयमस्य शक्तेश्च महत्त्वं निर्दिश्यते। वेदानुकूलाचरणम् अपरिहार्यम् इति निर्दिष्टम्। तत्र ''समित्पाणि: श्रोत्रियं ब्रह्मनिष्ठं गुरुम् उपगच्छेदिति'' पद्धतिराश्रयते।

**आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।**
**आचार्यो मृत्युर्वरुण: सोम ओषधय: पय:।।**

गुरु-शिष्य-सम्बन्धविवेचनायां स्पष्टं निर्दिष्टं यत् आचार्यो शिष्येषु मातृवत् पितृवच्च स्निह्यति व्यवहरति च।

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्त:।**
**तद् ब्रह्मचारी प्रायच्छत् स्वान् मित्रोऽध्यात्मन:।।**

छात्रस्य श्रमस्तपश्च शस्त्रद्वयं स्त:। स: तप: श्रमाभ्यां सर्व-लोकं पुष्णाति। यथा -

**ब्रह्मचारी समिधामेखलया श्रमेण लोकाँस्तपसा पिपर्ति।**

शिक्षाया उद्देश्यं विविच्यते वेदेषु शिक्षोद्देश्यरूपेण अध्यात्मज्ञानम्, आस्तिक्यम् शारीरिक-वाचिक-मानसिक-हार्दिक-बौद्धिक-समुन्नति: प्रतिपाद्यते। सायणाचार्य: ऋग्वेदादिभाष्यभूमिकायाम्, उल्लेखितवान् यद् यया वैदिकमन्त्राणां शुद्धातिशुद्ध-उच्चारणस्य बोधो भवति सा शिक्षा अभिधीयते-''स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा'' अर्थात् शिक्षाया उद्देश्यमस्ति-वर्णोच्चारणशिक्षा-प्रदानम्, कस्य वर्णस्य कस्मात् स्थानात् प्रयत्नाच्च उच्चारणं भवितव्यम्, स्वरयोजनं कथं क्रियते इत्यादि विषयाणां ज्ञानप्रदानम्।

आचार्य: कस्मात्? अस्मिन् विषये यास्केनापि निरुक्तशास्त्रे उक्तं यथा-

'आचार्य आचारं ग्राहयति' अर्थात् आचार्य: स अस्ति, य: छात्राय सदाचारस्य शिक्षां ददाति, न केवलं शिक्षामेव ददाति अपितु तं सदाचारवन्तं वा चरित्रवन्तं करोति तस्य हृदये सद्गुणान् संचारयति। तस्मै सदाचारस्य प्रेरणां ददाति।

'आचार्य आचिनोति अर्थान्' अर्थात् आचार्य: स अस्ति, य: शिष्यबुद्धौ विभिन्न-अर्थानाम्, शास्त्ररहस्यानां सम्यक् चयनं करोति।

'आचार्य आचिनोति बुद्धिमिति वा' अर्थात् आचार्य: स अस्ति, य: छात्रे विविध उत्तमोत्तमबुद्धिज्ञानादे: चयनं करोति।

गुरुशिष्यसम्बन्धमाश्रित्य तैत्तिरीयोपनिषदि अपि प्रोच्यते यद्-

**''आचार्य: पूर्वरूपम्। अध्येतास्युत्तररूपम्। विद्या सन्धि:। प्रवचनं सन्धानम् इत्यधिविद्यम्।''**

आचार्येण स्वस्य शिष्यस्य च अभ्युदयेच्छां प्रकटयता संहिताविषयकोपासनाविधि: प्रारब्ध:। आचार्यस्य अभिलाषा इयमस्ति यद् वयं तथा अस्माकं श्रद्धालु: विनयी शिष्योऽपि ज्ञानेन उपासनया च उपलभ्यमानं यश: ब्रह्मतेजश्च आप्नुयात्।

छात्राणां शम-दमादि गुणयुक्तत्वं प्रतिपाद्यते। विद्यायाश्च श्रीवर्धकत्वं शिष्यते। एवं प्रसंगे कालिदासेनापि रघुवंशे कथितम्-

**त्वचं स मेध्यां परिधाय रौरवी -**
**मशिक्षतास्त्रं पितुरेव मन्त्रवत्।**

कथितं तत्रैव शैशवकाल एव विद्याभ्यासाय उपयुक्त: समय: अस्ति।

**''शैशवेऽभ्यस्तविद्यानाम्''**

संस्कारै: शिक्षा प्रभाविता, पूर्वजन्मन: सहजसंस्कारा: अस्मिन् जन्मनि साफल्यं गच्छन्ति इति प्रसिद्धमेव। कालिदासेन आदर्शशिक्षकस्य अतुल्यपरिभाषा दत्ता। कश्चित् शिक्षको विद्याग्रहणे निपुणो भवति, कश्चिदध्यापनकार्ये प्रवीणो परन्तु श्रेष्ठतमशिक्षके उक्तद्वयो: गुणयो: समन्वय: प्राप्यते। यथा मालविकाग्निमित्रे -

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था,**
**संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां**
**धुरि प्रतिष्ठापयितव्य एव।।**

अध्यापनकार्येण शिक्षकस्य विद्या वृद्धिं प्राप्नोति। या विद्या अध्ययनकाले पठिता, सा विद्या अध्यापनसमये विलक्षणरूपेण विकसति। उक्तं च -

**सुशिक्षितोऽपि सर्व उपदेशदर्शनेन निष्णातो भवति।**

यदा शिक्षक: प्रवीणच्छात्रान् प्राप्नोति तदा, ते छात्रा: गुरो: उपदेशं शीघ्रतया अधिगच्छन्ति, तत्काले परिदृश्यते, यत् यथा शिष्य एव गुरवे शिक्षां ददाति इव इति। यथा मालविकाया: शिक्षाविषये कालिदासेन कथितम् -

**यद्यत् प्रयोगविषये भाविकमुपदिश्यते मया तस्यै।**
**तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे बाला।।**

शिक्षा कीदृशी भवेदस्मिन् विषयेऽपि कालिदासेन उक्तम् यथा-

**उपदेशं विदु:, शुद्धं सन्तस्तमुपदेशिन:।**
**श्यामायते न युष्मासु य: कांचनमिवाग्निषु।।**

वैशेषिकदर्शने 'यतोऽभ्युदय-नि:श्रेयस-सिद्धि: स धर्म:' इत्यनेन धर्मस्य लक्षणेन सहैव शिक्षाया उद्देश्यम् अभ्युदयस्य नि:श्रेयसश्च प्राप्तिर्निर्दिश्यते। 'विद्ययाऽमृत-मश्नुते' 'सा विद्या या विमुक्तये' 'ऋते ज्ञानात् न मुक्ति:' इत्यादिभि: सुप्रसिद्ध-सुभाषितै: अपि च 'सा शिक्षा या ब्रह्मगतिप्रदा' इति शंकराचार्य-वचनेन अध्यात्मज्ञान-प्राप्तिर्मोक्षाधिगमश्च शिक्षाया लक्ष्यं निर्धार्यते।

शिक्षाविद्भि: शिक्षाया उद्देश्यं बालकस्य सर्वाङ्गीणं विकासो मन्यते। तस्य शिक्षा च मातृ-भाषामाध्यमेन स्यात्। रटनक्रिया परिहार्या। ज्ञान-विज्ञानद्वारा मानवहृदये नैतिकधार्मिकभावनानां समुद्बोधनं स्यात्।

समग्ररूपेण शिक्षाया उद्देश्यं विविच्यते तदा वक्तुं शक्यते यत् तादृशी शिक्षा श्रेयस्करी या मनुष्याणां जीविकोपार्जने साहाय्यम् आचरेत्। तेषां बौद्धिकं विकासं प्रतिपादयेत्। जनं सुसंस्कृतं सभ्यं च विधाय तस्य सांस्कृतिकम् उत्कर्षं सम्पादयेत्। चरित्रनिर्माणेन नैतिकताया विकासं कुर्यात्। स्वावलम्बनभावना विकसेत्, उत्तरदायित्वभावना प्रचरेत्। सर्वासु सम-विषमासु परिस्थितिषु कार्यसम्पादनक्षमता संजायेत। बालकानां तथाविधं सर्वाङ्गीणम् उन्नयनं स्याद् यथा स्वस्थे शरीरे स्वस्थं मन: इति। शिक्षाविषये श्रमस्य महत्त्वमपि स्थापयति।

एवं श्रेष्ठ: शिक्षकोऽपि स्वशिक्षार्थं श्रेष्ठपात्रं मृग्यते। अस्मिन् सन्दर्भे कालिदासस्येदं कथनं नितान्तं स्पष्टम्।

**पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातु:।**
**जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य।।**

शोधार्थिनी,
संस्कृतविभाग: डॉ. भीमराव अम्बेडकर राजकीय
स्नातकोतर महाविद्यालय:, श्रीगंगानगरम् (राज.)

# भारतीमञ्जुनिकुञ्जम्

## (पूर्वानुवृत्तम्)

❑ डॉ. रामनारायण झा

**पाणिनिमातुलव्याडिकृतसंग्रहनामा ग्रन्थः**

मातुलः पाणिनेर्लक्षपद्यात्मकं,
संग्रहं नाम पुस्तं विशालं बुधः।
व्याडिनामा सुचक्रेऽद्य लुप्तः पुरा,
हा कथं भारते भारती आहता।। 189।।

**पाणिनिकात्यायनपतञ्जलिनुतिः**

बुध्नतः प्रत्नशैल्या अमी कोविदा,
वन्दितं देववक्तृषु रत्नत्रयम्।
नौमि नित्यं बुधां मानसे राजितम्,
आहता भारते भारती हा कथम्।। 190।।

**नव्यव्याकरणकर्ता भट्टोजिदीक्षितः नागेशः कौण्डभट्टः वरदराजश्च**

दीक्षितस्तेषु नागेशभट्टाभिधः,
कौण्डभट्टस्ततः कौमुदीलेखकः।
नव्यशैल्या नवा ये सुवैयाकृता,
हा कथं भारते भारती आहता।। 191।।

**भट्टोजिदीक्षितकृतशब्दकौस्तुभम्**

कौस्तुभं नाम पुस्तं सुशब्दोपरि,
शब्दपूर्वं जग्रन्थैष भट्टाभिधः।
साधुवाचस्पतिः मैथिलो नौमि तम्,
आहता भारते भारती हा कथम्।। 192।।

**सिद्धान्तकौमुदीप्रतिष्ठा**

अर्पितैषापि तस्याद्य राद्धान्तदा,
शब्दशास्त्रार्थशैल्यातिसंसज्जिता।
कौमुदी भाति सिद्धान्तपूर्वा नवा,
हा कथं भारते भारती आहता।। 193।।

**लघुसिद्धान्तकौमुदीमहिमा**

नूत्नरीत्याः कृतिश्चान्तिमा कौमुदी,
चागलं यस्य लघ्वीयुता भाषणे।
लेखने चाप्यमोघा गतिस्तस्य सा,
हा कथं भारते भारती आहता।। 194।।

**लघुशब्देन्दुशेखरः**

न्यायरीत्यैधितं व्याकृतं नूतनं,
चाद्धुतन्तच्चकास्ति प्रकृष्टां धियम्।
कारयद् बुद्धियामं प्रकामं बुधान्,
भारती आहता हा कथं भारते।। 195।।

**नागेशकृद् ग्रन्थाः**

भाष्यवेत्ताशु नागेश्वरो शेखरं,
पेटिकास्तत्र नैकं बबन्धायकम्।
घूर्ण्यते विज्ञविज्ञैरधीत्याद्य ताः,
हा कथं भारती भारते आहता।। 196।।

**वेदांगव्याकरणं तथा व्याकृतिप्रयोजनम्**

वक्त्रमङ्ग प्रधानं श्रुवेर्त्याकृतं
रक्षणञ्चागमो वै समूहालघु।
हेतवंस्सशयाभावनं पञ्चधा
हा कथां भारते भारती आहता।। 197।।

**वेदांग साहित्य-भेदः**

येन वेदार्थबोधस्सुबोधो बुधैस् -
तेन वेदाङ्गसाहित्यकल्पः कृतः।
तस्य षोढा विभेदोऽपि शास्त्रे हितः,
हा कथं भारते भारती आहता।। 198।।

**पाणिनिभ्राता पिंगलः, तच्छन्दः**

पिङ्गलाचार्यसूतं हि छन्दो द्विधा,
लोकजातं समस्तं शुभं वैदिकम्।
सप्त सिद्धाश्च लान्ति लयं ह्लादकम्,
आहता भारते भारती हा कथम्।। 199।।

वार्णिकम्मात्रिकञ्चासमस्तं समम्,
अर्धमंगं श्रुतेश्चारु वर्णात्मकम्।

पिङ्गलश्चापरन्नाम पादौ तथा,
हा कथं भारते भारती आहता।। 200।।

**यज्ञसहायकं ज्यौतिषम्**

अङ्गरत्नं सुनेत्रद्वयं ज्यौतिषं,
मासपक्षौ तिथिस्तस्य सम्वत्सरः।
यज्ञसम्पादने ज्ञानमावश्यकम्,
आहता भारते भारती हा कथम्।। 201।।

**वेदांगशिक्षा**

पाणिनेर्याज्ञवल्क्यस्य शिक्षाद्वयं,
विंशतिश्शिक्षते शुद्धमुच्चारणम्।
तासु शिक्षास्स्वरं घ्राणमङ्गं श्रुतेः,
हा कथं भारते भारती आहता।। 202।।

**वेदांगः कल्पः**

कल्पसूत्रं सुहस्तौ चतुर्धास्ति यच्-
छ्रौतगृह्ये ततो धर्मशुल्वे तथा।
वेदयज्ञाः क्रमेणात्र सम्पादिता,
हा कथं भारते भारती आहता।। 203।।

**वेदांगं निरुक्तम्**

श्रोत्रमङ्गं शृणोति श्रुतेस्स्फोटनं,
यास्कसूतन्निरुक्तन्निरुक्तिश्च तत्।
संविधत्ते सुवाचाञ्चतुर्धा पदम्,
आहता भारते भारती हा कथम्।। 204।।

तत्र काण्डत्रयन्दैवतन्नैगमञ् -
चान्तिमञ्चास्ति नैघण्टुकं विश्रुतम्।
ख्याति व्याख्यां निघण्टोर्निरुक्तन्नवाम्,
आहता भारते भारती हा कथम्।। 205।।

-व्याख्याता (संस्कृत)
राजकीयश्रीकल्याणमहाविद्यालय, सीकर

## गलज्जलिकाद्वयम्

❑ मिश्रोऽभिराजराजेन्द्रः
पूर्वकुलपतिः ( शिमला )

**1. अपार्थकं युद्धं कृतम् -**

एकान्तमास्थाय क्वचित्कस्मान्न हरिनाम स्मृतम्
दुर्भाग्यमासीन्मामकं यदपार्थकं युद्धं कृतम्।। 1।।
पिचुमन्दबदरीखदिरशाखोटकशमीजननक्षमा
मरुभूरियं ननु जानतेति रसालवनमुपकल्पितम्।। 2।।
एतन्मुखे दशनद्वयी किल कालकूटरसाञ्चिता
ज्ञात्वाऽपि सम्यगिदं गृहे फणिभृत्कलत्रमुपाश्रितम्।। 3।।
कामन्दकं कौटिल्यमथ विदुरं मनुं पठताऽप्यहो
कस्मान्मया रमणीमनो मनसा निजेन समीक्षितम्।। 4।।
मुषिते गृहे जागरणलाभो को नु सम्प्रति चिन्तये
कस्मान्न तत्क्षणमेव नयनं हा विधे! प्रोन्मीलितम्।। 5।।
सम्प्रत्यवैमि यथा मयाऽतीते समाचरिता त्रुटिः
दुःखं यथा न्वभिनन्दितं काम्यं सुखञ्च कदर्थितम्।। 6।।
इयती विधातः का नु भविता जीवनस्य तु लाञ्छना!
घस्मरनिदाघदिने गते यदिदं सरोवरमीक्षितम्।। 7।।
औचित्यसीमानस्समे मन्ये तदैव खिलीकृताः
पिककण्ठमाधुर्यं यदा मौकुलिकुलैर्नु परीक्षितम्।। 8।।

**2. न कस्यापि दृष्टं मुखम्**

नोन्मदोऽभूवमैश्वर्यगर्वैर्न वा
दैन्यदुःखेन कस्यापि दृष्टं मुखम्।। 1।।
न्यूनमासीन्न चाऽपेक्षया वाऽधिकम्
यन्नु धात्रा प्रदत्तं मदर्थं सुखम्।। 2।।
कीदृशो मे विचित्रो नु यात्रापथः।
हन्त, सव्ये ऽपसव्ये मरुस्सम्मुखम्। 3।।
भालपट्टे ऽथ सीतावियोगोऽङ्कितः
तत्किमर्थं मयोत्थापितं कार्मुकम्।। 4।।
यां विना जीवितुं न क्षमेऽहं क्षणम्
उर्वशी हृत्स्वकं साऽभिधत्ते वृकम्2।। 5।।
घर्मतप्ता जले शेरते सैरिभाः
शैत्यविग्निास्तटं ते3 ज्वलद्बालुकम्।। 6।।
मातुलानीमहो निर्मितुं पश्य भोः
प्रत्ययं पाणिनिश्चाप्युपैत्यानुकम्4।। 7।।
संसृतौ सर्व एव स्वदाक्ष्यैर्मताः
विद्धि तुल्यं कविं काञ्चनं कारुकम्।। 8।।
रामनामाऽङ्कितं येन वा, यत्र वा
मुक्तिमर्हेत्स कीटोऽथ तद्दारुकम्।। 9।।

1. रामेण 2. न वै स्त्रैणानि सख्यानि सन्ति। सालावृकाणां हृदयान्येता।। ऋक्. १०.९५.१५
3. नक्राः। 4. हिमारण्ययवयवनमातुलाचार्याणामानुक्।

# आधुनिककाले संस्कृत-पत्रकारिताया उपयोगिता

❑ डा. घनश्याम बैरवा
व्याख्याता (संस्कृत)

पत्रकारिता नाम लोकतन्त्रस्य चतुर्थः स्तम्भः। विधायिका, कार्यपालिका, न्यायपालिका चेति लोकतन्त्रस्य महत्त्वाधायि स्तम्भत्रयमिति तु सुविदितमेव। पत्रं करोति इति पत्रकारः पत्रकारस्य भावः कर्म वेति विग्रहे पत्रकारशब्दात् 'तस्य भावस्त्वतलौ इत्यनेन तल्प्रत्ययेऽनुबन्धलोपे' 'पत्रकार+त' इति जाते तलन्तं स्त्रियामिति लिङ्गानुशासन-सूत्रेण स्त्रीत्वात् टापि अनुबंधलोपे सवर्णदीर्घे 'पत्रकारता' शब्दो निष्पन्नः। पत्रकारता-अर्थात् पत्रकारविशिष्टा वृत्तिः पत्रकारस्य कर्मत्वं वा। अतः पत्रकारता पत्रकारितेति शब्दद्वयमपि समीहितार्थे सुमुचितमेव।

विश्वविश्रुते लोकतन्त्रे भारते पत्र-पत्रिकाणामुपयो-गित्वं सुविदितमेव। जनानां जागरूकतायै सम्यक्रूपेण प्रबोधनार्थञ्च सर्वत्र विविधभाषामाध्यमैः पत्र-पत्रिकाः प्रकाश्यन्ते। राष्ट्रे जागृयाम वयम् इत्येतदर्थं पत्रपत्रिकाणां बहुविधमुपयोगित्वं स्वतः सिद्धं भवति। संस्कृत-पत्र-पत्रिकाणां माध्यमेन एव अद्यापि कन्याकुमारीतः प्रारभ्य हिमालयं यावत् भारतराष्ट्रं सांस्कृतिकं ऐक्यं अनुभवति। भारतीय वाङ्मये जगतः प्रथम-पत्रकारस्य गौरवं देवर्षिः नारदः समाप्नोति। संक्षेपेण अवलोकनं कृत्वा संस्कृत-पत्रकारितायाः स्वरूपं रामायणम्, महाभारतम्, मेघदूतम्, अभिज्ञानशाकुन्तलम् इत्यादिषु, ख्यातनामसुः संस्कृतग्रन्थेषु दृश्यते। तत्पश्चादपि विविध-साम्राज्यकालेषु तस्याः विकासो जातः।

यथा प्राचीनकाले ग्रंथेषु संदेशो वा वृत्तप्रसारणाय पत्रकारितारूपे लिख्यतेस्म तथैव साम्राज्यकालेऽपि गुहाभित्तिषु, शिलासु, पाषाणस्तम्भेषु स्वसूचनायै वृत्तंप्रसार्यते स्म। कतिस्थाने तद् वृत्तं ताम्रपत्रेषु, ताडपत्रेषु, वस्त्रेषु अपि आसीन्।

संस्कृत-पत्रकारितायाः इतिहासे इदं नूनमवधेयं यत् संस्कृत-पत्रपत्रिकाणां विकासः प्रायेण मासिक-पत्रिकाणां प्रकाशनेन सहैव आरब्धः। 1866 तमे वर्षे जूनमासस्य प्रथम दिनाङ्कात् – 'काशीविद्यासुधानिधिः' इति प्रथम-संस्कृत-मासिकपत्रिका काशीतः प्रकाशिता। अस्याः पत्रिकायाः अपरं नाम-पण्डितः आसीत्। अस्याः पत्रिकायाः प्रमुखोद्देश्य-मासीत् दुर्लभानाम् अप्रकाशितानां च ग्रन्थानां प्रकाशनम्। अस्यां पत्रिकायामनेके प्राचीनाः प्रामाणिकाः संस्कृत-ग्रन्थाः प्रकाशिताः।

यद्यपि भारते सर्वप्रथमं संस्कृतपत्रिकाणां विवरणं डॉ. अर्नेस्टहासः प्रादात्। तेन पत्रिकाद्वयस्य सामान्यपरिचयः प्रदत्तः। अनन्तरं मैक्समूलरः स्वकीयग्रन्थे संस्कृतस्य अध्ययनाध्यापनविषयकं वृहदुल्लेखम् अकरोत्। तेन लिखितं यत् 'संस्कृतमेवैका एतादृशी भाषास्ति या अद्यापि देशस्य एकस्मात् प्रदेशात् अन्यप्रदेशं यावत् जनैः भाष्यते अवगम्यते। संस्कृतपत्रकारितायाः यात्रामध्ये अनेका बाधाः समुपस्थिताः। अनेकत्र कण्टकाकीर्णमार्गे विकासयात्रातीव मन्दतामुपगता, परन्तु सौभाग्यस्यायं विषयो यत् सतीष्वप्यनेकासु बाधासु यात्रा निरंतरं प्रावर्धत। अस्याः क्रमानुशीलनेन स्पष्टं प्रतीयते यत् संस्कृतपत्रपत्रिकाणां चिरात्प्रारब्धा सेयं यात्रा क्रमशोऽभ्युदय-पथि प्राचलत्। संस्कृतस्य रक्षणार्थं बहवः उपायाः सन्ति। तेषु उपायेषु एकः उपायः अस्ति यत् संस्कृतपत्रपत्रिकामाध्यमेन संस्कृतस्य रक्षणम्, आधुनिक-काले संस्कृत पत्रकारिताया उपयोगिता इति। मंजुभाषिणी-पत्रिकायां संस्कृतपत्रिकायाः विषये एवम् उक्तम्- ''**पत्रिका हि नाम सुहृदामादरमेकमेव शरणयन्ती नरपतिरिव जनानुरागं विभिन्नरुचिषु सर्वेषु कान्तमात्मीयं पश्यत्सु पत्रिका ग्राहकेष्वावलम्बनम्।।'' मंजुभाषिणी 1.1** संस्कृतपत्रकारिता संस्कृतभाषायाः रक्षणं करोति। ज्ञानिजनानां पिपासायाः तृप्तिं कारयति। संस्कृतभाषायाः प्राचार-प्रसारे उत्तमोत्तमं माध्यमम् आधुनिक संस्कृत साहित्यस्य ज्ञानाय उपयोगी इति अनेन कारणेन आधुनिककाले

संस्कृतपत्रिकायाः महती आवश्यकता वर्तते। कालिदासेनापि कथितं नाट्यविषये पंक्त्याः अधारोऽपि पत्रिका एवास्ति यथा-

**''पत्रं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।''**

''संस्कृतपत्रकारिता सर्वश्रेष्ठजनसेवास्ति- यथा पत्रिका नाम नो वणिग्वृत्तिर्न च शासनाधिकारो न वा धनपिशाचाराधनकल्पो नैव भिक्षावृत्तिर्याचकत्वं पौरोहित्यं वा पत्रकारिता तु तावल्लोकसेवायज्ञाङ्गितयोकर्मोपासनायोगा-भ्यासो-अन्यायविरुद्धं युद्धं जननेतृत्वमपि शिक्षकत्वमिव किमपि विचित्रं सत्कर्म।'' दिव्यज्योतिः 1.2 प1. 12

संस्कृत-संरक्षणार्थं, सामाजिकाभ्युदयकामनया सम्प्रति भारते अशीतिः पत्रिकाः प्रकाश्यतां यान्ति। संस्कृते दैनिक वार्तापत्रस्य प्रकाशनं सर्वथा दुष्करं कार्यं परं देववाणी ग्रामे ग्रामे नगरे नगरे गृहे विहरतु इति लक्ष्यं स्वीकृत्य सम्पादकाः प्रकाशकाः च नियमितरूपेण संस्कृते दैनिक पत्राणां पत्रिकाणां अपि च मासिकपत्रिकाणां प्रकाशनं कुर्वन्ति। यद्यपि अत्र लेखकानाम् अभावः, पाठकानां ग्राहकाणां च अभावः विज्ञापनानां अभावः तथापि ते सोत्साहेन कार्यरताः सन्ति। संस्कृत-पत्रकारिता माध्यमेन एव संस्कृतस्य रक्षणम् अत्यंतं वेगेन भवति। कारणं संस्कृतपत्रिकासु विविधाः विषयाः भवन्ति, समयानुसारे तस्या प्रकाशनं भवन्ति अतः यः कोऽपि यदा कदापि यत्रकुत्राऽपि संस्कृतपत्रिकां पठितुं शक्नोति। तेन माध्यमेन स्वयं संस्कृतं पठति, अन्येभ्यः पठितुं प्रेरणां ददाति। इदानीं तु अन्तर्जाल (इन्टरनेट) माध्यमेन विश्वस्य कोणे स्थित्वापि वयं संस्कृतपत्रिकां तत्काले दृष्टुं पठितुं च शक्नुमः।

संस्कृतपत्रिका संस्कृतप्रचारप्रसारस्य माध्यमम् अस्ति। यतोहि संस्कृतभाषा सद्गुणानां सिञ्चनं करोति। ये संस्कृतं जानन्ति ते प्रायशः दुराचारात् मुक्ताः भवन्ति। यदि सर्वे संस्कृतज्ञाः पत्रकारक्षेत्रे आगमिष्यन्ति तर्हि पत्रकारत्वक्षेत्रे नीतिनिपुणानां प्रमाणं वर्धिष्यति। संस्कृतपत्रकारितायाः कारणेन सद्गुणानां सद्विचाराणां च वितरणं भविष्यति। संस्कृतं ज्ञानविज्ञानयोः अमूल्यनिधिः अस्ति। भारतस्य सर्वाः प्रान्तीयभाषाः षष्टिः सप्ततिः प्रतिशतं संस्कृतस्य शब्दान् स्वीकृत्य जीवन्ति। यदि संस्कृतशब्दानां निष्काषणं कुर्मः चेत् तासां भाषाणाम् अस्तित्वस्य प्रश्नः उद्भवति। निष्कर्षतः संस्कृतपठने बहुक्लेशः न भवति, कारणम् अस्माकं तु श्रवणसंस्काराः मातृभाषायाः आधारेण सन्ति एव। येन वयं संस्कृतं सरलतया अवगच्छामः। यदि वयं सरलसंस्कृतेन पत्रिकायाः निमार्ण कुर्मः, ततु संस्कृतभाषायाः केवल रक्षणं न अपितु, महता वेगेन तस्याः प्रचारप्रसारो भविष्यति। अस्मिन् विषये अप्पाशास्त्री-महोदयेन उक्तं यत् ''तासां तासां च भाषाणामेकान्तिकाऽभ्युदये विशेषतश्च विलीन-प्रायप्रचाराणां पुनः प्रचारोपक्रमे तत्तद्भाषामयानि संवादपत्राणि मासिकपत्र-पत्रिकाश्च भूयसीं हेतुतामधिगच्छन्तीति।'' मंजुभाषिणी 1.4 पृ. 53

निष्कर्षतः संस्कृतपत्रकारिता बहुजनहिताय बहुजनसुखाय चास्ति।

**संदर्भ :-**


1. संस्कृतपत्रकारिता – डॉ. बलदेवानन्द सागर।
2. राजस्थाने संस्कृतपत्रकारिता – डॉ. चेतना।
3. संस्कृतपत्रकारिता का इतिहास – रामगोपाल मिश्र।
4. राजस्थान संस्कृत पत्रकारिता को अवदान (शोध प्रबन्ध) डॉ. ज्योति शर्मा।
5. संस्कृत एवं प्राच्य विद्या के प्रमुख संदर्भ एवं सूचना स्रोत-दिनेश कुमार तिवारी।
6. पत्रकारिता के सिद्धान्त – डॉ महेन्द्र कुमार मिश्रा।
7. संस्कृतपत्रकारिता – सम्पादकीय दृक् (अंक 26-27) बनमाली विश्वाल।
8. स्वातन्त्र्योत्तर संस्कृत तथा साहित्य-निबंधकार-देवर्षि कलानाथ शास्त्री।
9. संस्कृत साहित्य बीसवीं शताब्दी – डॉ. राधाबल्लभ त्रिपाठी।
10. संस्कृतवर्तमानपत्रम्, दैनिक पत्र बड़ोदरा-सम्पादक प्रफुल्ल पुरोहित।



रिसर्चअवार्डी (यू.जी.सी.)

संस्कृत विभाग, राजस्थान विश्वविद्यालय, जयपुर

# शिवशब्दोच्चारणमात्रेण सिद्धत्वमाप्नुवन्ति जन्तवः

❑ डॉ. गीता शुक्ला



**शिवशब्दोच्चारणमात्रेण, सिद्धत्वमाप्नुवन्ति जन्तवः।**
**शिवेति द्व्यक्षरं नाम, व्याहरिष्यन्ति ये जनाः।।**
**तेषां स्वर्गश्च मोक्षश्च, भविष्यति न चान्यथा।**
**शिवैक्य आश्रयग्रहणेन मृत्युरपि मरणत्वं याति।**
**चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः।।**
**पद्मपुराणे**

**शीङ् धातोः औणादिके वनि प्रत्यये कृते शीङ़ो ह्स्वत्वे च कृते 'शिव' शब्दस्य सिद्धिःभवति।**

'शेते जगदस्मिन्निति शिवः' शेतेऽस्मिन् सर्वमिति शिवः शम्भुः त्रैलोक्यनाथः महादेवश्च। शिवः सर्वव्यापकः। जगत् शिवे शेते, शिवस्तु जगतः प्रतिवस्तु व्याप्य तदतिरिक्तो-ऽवाच्योऽवेद्योऽग्राह्यो वाऽस्ति। अखण्डविभूतिविभूषितस्य शिवस्य स्तुतिं कर्तुं कः समर्थः।

**असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे**
**सुरतरुवरशाखा लेखनी पत्रमुर्वी।**
**लिखति यदि गृहीत्वा शारदा सर्वकालं**
**तदपि तव गुणानामीश पारं न याति।।( शिवमहिम्न 32**

कल्याणकारी देवविशेषः शिवः। यः जगतः सर्वजीवानां निराकांक्षरूपेण कल्याणसाधनं करोतीति शिवः। शिवं कल्याणं विद्यतेऽस्य शिवः। कलिकालानलविदग्धजीवाः शिवरतिमवाप्य परमानन्दपदे प्रतिष्ठापनं प्राप्नुवन्ति।

शम्भुः भक्तानां कृते सर्वाशुभान् विनाश्य अभयत्वं प्रददाति।'श्यति अशुभमिति वा'

**अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्**
**पठति परमभक्त्या शुद्धचित्तः पुमान् यः।**
**स भवति शिवलोके रुद्रतुल्यस्तथात्र**
**प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च।। शिवमहिम्न 34**

एवम् शिवगुणकीर्तन-गाायन-स्मरण-पूजनानुरक्ताः भक्ताः शिवतुल्यत्वं परमपदस्वरूपत्वञ्च प्राप्नुवन्ति।

शेरतेऽवतिष्ठन्ते- अणिमादयोऽष्टौ गुणाः अस्मिन् इति शिवः, व्युत्पत्यनुसारेण शिवः अणिमादिसिद्धिसम्पन्नः भक्तेभ्यः प्रदायकश्च।

उक्तव्युत्पत्तिचिन्तनेन शिवस्य अधोविन्यस्तं स्वरूपम् प्राप्नोति।

- जीवनसंरक्षकः परकल्याणसाधकः कारुणिकश्च
- विश्वस्य समुत्पादकः पालकः संहारकश्च
- मलविनाशकः मांगलिकश्च
- सर्वसामर्थ्यसम्पन्नः सर्वव्यापकः
- भक्तेभ्यः सर्वसामर्थ्यप्रदायकः

ईदृशी अस्ति नीलकण्ठस्य विभूतिः। वर्णक्रमेण अपि शिवशब्दस्य चिन्तनेनापि बहुवैशिष्ट्यम् उपलभ्यते। शिवशब्दो शकार-इकार वकार-विसर्गानां समन्वये सति व्युत्पन्नो भवति। प्रसङ्गे ऽस्मिन् श्-इ-व्-अ-विसर्गानां महत्त्वम् अपि विचार्यम्।

'श'- तालुस्थानोच्चारणीयत्वात् तालव्यशकारः व्यंजनवर्णः अस्ति। कामधेनुतन्त्रे शकारः सर्वसिद्धिप्रदायकः,

रक्तवर्णप्रभाकारब्रह्मविग्रह- रूप: सत्त्वरजतमोगुणसम्पन्नश्च निरूपितम्-

**शकारं परमेशानि ! शृणु वर्णशुचिस्मिते।**
**रक्तवर्णप्रभाकारं स्वयं परमकुण्डली।।**
**चतुर्वर्गप्रदं देवि ! शकारं ब्रह्मविग्रहम्।**
**पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये।।**
**रज:सत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा।**
**त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम्।।**
**कामधेनुतन्त्रम्**

योगिनीतन्त्रे अपि शकारस्वरूपस्य निर्देशोऽस्ति -

**श: सव्यश्च कायरूपो कामरूपो महामति:।**
**सौख्यनामा कुमारोऽस्ति श्रीकण्ठो वृषकेतन:।।**

काव्यादौ शकारस्य प्रयोग: परमसुखदायक: मांगलिक: शुभप्रदश्च। उक्तम् बृत्तरत्नाकरटीकायां- श: सुखं सस्तु खेदम्

**क्लीबे शं शब्द: शुभस्य कल्याणस्य मंगलस्य च वाचक:।**

'इ' इतिव्यक्ति-शक्ति-प्रदायक: अस्तिस्वसामर्थ्य-विभूषक: गुणत्रयसमन्वितश्च। चतुर्दशमाहेश्वर सूत्राणां प्रथमसूत्रस्य (अ इ उ ण) द्वितीय: वर्ग:। स्वरवर्णेषु तृतीय: वर्ण:। अस्योच्चारणस्थानमपि तालु:।स च ह्स्व-दीर्घ-प्लुतश्च भवति। अपरञ्च उदात्तानुदात्तस्वरितभेदात् त्रिविध:। अनुनासिकाननुनासिकभेदाच्च प्रत्येकं द्विविध:।

इकार: परमानन्दस्वरूप: शक्तिसम्पन्न: सर्वगुण-विभूषितश्च। उक्तं कामधेनुतन्त्रे -

**इकारं परमानन्दं सुगन्धकुसुमच्छविम्।**
**हरिहरब्रह्ममयं वर्णं सदारुद्रयुतं प्रिये।।**
**सदाशक्तिमयं देवि गुह्यंब्रह्ममयं तथा।**
**सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम्।।**
**हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम्।**
**इकारे परमेशानि स्वयं कुण्डली मूर्तिमान्।।**

अस्यानेकनामान्यपि वर्णाभिधानतंत्रेऽपि उल्लिखितानि सन्ति-

**इ: सूक्ष्मा शाल्मलीविद्या चन्द्र: पूषा सगुह्यक:।**
**सुमित्र: सुन्दरो वीर: कोटर: काटर: पय:।।**
**भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका।**
**शान्त: कान्त: कामिनी च कामो विघ्नविनायक:।।**

एवं 'इ' वर्ण: सामर्थ्य-अभिव्यक्ति-पुरुषार्थवाचक: परमानन्दस्वरूपविभूषित: सुन्दराकर्षकश्च।

'व'-वकारस्योच्चारणस्थानं दन्त: ओष्ठश्च। स च मोक्षवाचक: अव्ययस्वरूपसम्पन्न: सामर्थ्ययुक्त: दीप्तिदीप्तश्च। कामधेनुवर्णोद्धारतन्त्रयोरिदं स्वरूपं विस्तरेण वर्णितमस्ति।

**'अ:' - अ: कण्ठगो महासेन: कलापूर्णामृता हरि:।।**
**इच्छा भद्रगणेशश्च रतिर्विद्यामुखी सुखम्।।वर्णोद्धारतन्त्रम्**

विसर्गस्य स्वरूपं तन्त्रागमग्रन्थेषु विस्तरेण विवृतमस्ति।

विसर्गोऽयं कामधेनुतन्त्रानुसारं ज्ञानस्वरूपवाचक: आत्मादितत्त्वसंयुक्तश्च अस्ति।

एकाक्षरकोषे अ: परमेश्वरस्य महेश्वरस्य च वाचक:।

महाभारते लिखितमस्ति-

**बिन्दु: विसर्ग: सुमुख: शर: सर्वायुधै: सह।**

एवं शिव: मंगलस्वरूपसंसाधक: मंगलप्रदायक: दु:खविनाशक: भक्तानामभयंकर: सर्वव्यापी सर्वसमर्थ: इच्छाधीनविग्रहधारणशक्यश्च। प्रजानामुत्पत्ति-पालन-संहारकर्ताऽयं शिव: विश्वप्रपञ्चे व्याप्य तदतिरिक्तमवस्थितोऽस्ति। स अवाच्य: अग्राह्य: परंतु भक्तवशवर्तीभूत:। स जगच्छरण्य: विश्वमूर्तेरवधारकश्च एतादृशगुणोपेत: त्रिगुणातीतस्वरूप: शिव: कस्य न कल्याणसाधक:। तस्य परमार्थस्वरूपं ज्ञातुं क: समर्थ: ?

एसो.प्रो., संस्कृत-विभाग:
भ.दी.आ.क.स्ना. महाविद्यालय:, लखीमपुर-खीरी

## आयुर्वेद स्तम्भः

# रसायनं प्रयुञ्जीत

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः



**आयुर्वेदस्य प्राथमिकं प्रयोजनं वर्तते- 'स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनं च'। स्वस्थस्य किं लक्षणमित्यपि प्रोक्तम् आयुर्वेदे, यथा-**

**समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।**

**(सु.सू. 15/41)**

**अत एवेदृग्विधस्य स्वस्थस्य स्वास्थ्यरक्षणं सर्वदा करणीयम्। यतो ह्याहारविहाराणां विधिपूर्वकं सेवनं दोषादीनां समत्वमापादयति, विधेः परित्यागस्त्वेषां समेषामसमत्वं समुत्पादयति। यदा हि दोषादीनामभिवृद्धिः क्षपणं वा भवत्यविधिपूर्वक-सेवितैराहारविहारादिभिः तदाऽस्वस्थो भवति जनः। एतादृग्विधे जने भवन्ति विकाराः। अत एव स्वस्थस्य स्वास्थ्यरक्षणं कुर्यादस्वस्थस्य विकारप्रशमनं चकुर्यात्।**

आयुर्वेद का प्राथमिक प्रयोजन है- स्वस्थ के स्वास्थ्य का रक्षण और रोगी के विकार का शमन करना। स्वस्थ का क्या लक्षण है यह भी आयुर्वेद में कहा गया है। यथा-

सम दोषवाला, सम अग्निवाला तथा धातुओं और मलों की सम क्रिया वाला हो तथा जो प्रसन्न आत्मा, प्रसन्न इन्द्रियों और प्रसन्न मनवाला हो वह स्वस्थ कहा जाता है।

इसलिए इस प्रकार के स्वस्थ व्यक्ति के स्वास्थ्य का संरक्षण सर्वदा करना चाहिए। क्योंकि आहार-विहार का विधिपूर्वक सेवन दोषादि की समता को सम्पन्न करता है। विधि का त्याग तो इन सभी की असमता को उत्पन्न करता है। जब दोषादि की वृद्धि या क्षपण अविधिपूर्वक सेवन किए गए आहार-विहारादि से होता है तब व्यक्ति अस्वस्थ होता है। इस प्रकार के व्यक्ति में विकार होते हैं। इसलिए स्वस्थ के स्वास्थ्य का रक्षण और अस्वस्थ के विकार का प्रशमन करना चाहिए।

**स्वस्थस्य स्वास्थ्यरक्षणक्रमे दिनचर्या-ऋतुचर्यादीनां सम्यक् प्रयोगः सर्वदा करणीयः। दिनचर्यादीनां क्रम एव रसायनसेवनमपि निर्दिशन्त्यायुर्वेदविदः। सामान्यतया भेषजं द्विविधं भवति, तद्यथा-किञ्चित् स्वस्थस्योर्जस्करं, किञ्चिदार्तस्य रोगनुद् भवति। अत्रकिञ्चिदिति विशेषणेन किञ्चिदेन भेषजम् ऊर्जस्करं किञ्चिदेव च रोगहरं भवति न सर्वं भेषजम्। ऊर्जः प्रशस्तं भावं करोत्यत एव किञ्चिद् भेषजमूर्जस्करं भवति, एतद् भेषजं तु सामान्यतया स्वस्थ एव व्यवह्रियते। अत एव स्वस्थत्वेन व्यवह्रियमाणस्य पुंसो ज्वरादिस्वाभाविकव्याधिहरत्वेन तथाऽप्रहर्षा-व्यवायक्षयित्वानुपचितशुक्रत्वाद्यप्रशस्तशारीरभावहरत्वेन ऊर्जः प्रशस्तं भावमादधातीति स्वस्थस्योर्जस्करम्। आर्तस्य रोगनुदिति विशेषणेन ज्वरादिनाऽऽर्तस्य ज्वरादिहरम्।**

स्वस्थ के स्वास्थ्य के रक्षण क्रम में दिनचर्या और ऋतुचर्या आदि का सम्यक् प्रयोग सर्वदा करना चाहिए। दिनचर्यादि के क्रम में ही आयुर्वेदज्ञ रसायन के सेवन का भी निर्देश करते हैं। सामान्यतया भेषज दो प्रकार की होती है, जैसे-कुछ स्वस्थ के ऊर्जस्कर होती है तथा कुछ आर्त (पीडित) के रोग को दूर करने वाली होती है। यहाँ पर 'किञ्चत्' इस विशेषण से कुछ ही भेषज ऊर्जस्कर होती है और कुछ ही रोगहर होती है, सभी नहीं। ऊर्जस ''अर्थात् प्रशस्तभाष को करती है, इसलिए कुछ भेषज ऊर्जस्कर होती है, यह भेषज तो सामान्यतया स्वस्थ में ही व्यवहृत होती है। इसलिए स्वस्थ माने जाने वाले पुरुष के वृद्धावस्था आदि स्वाभाविक रोगों का हरण करने वाली (भेषज) होने से तथा अप्रहर्ष, व्यवाय (मैथुन), क्षययुक्तता, क्षीणशुक्रता आदि शरीर के अशुभ भावों की नाशक होने से 'ऊर्जः' अर्थात् प्रशस्त भावों का आधान करती है अतः यह स्वस्थ के ऊर्जस्कर होती है। आर्त के रोग का नाश करने वाली 'रोगनुत्' इस विशेषण से आर्त (पीडित) के ज्वरादि का हरण करने वाली होती है।

'यत्तु स्वस्थस्योर्जस्करं प्रायः तद्वृष्यं तद्रसायनं भवति' इति त्वाचार्यः चरकः निर्दिशति। अत्र प्रायः शब्दो विशेषार्थत्वेन प्रयुक्तः, यतो हि यद् वृष्यं प्रायो भवति, तथा रसायनं यत् प्रायो भवति तद् बाहुल्येन। कदाचित्तु यद् वृष्यं यद् रसायनञ्च भवति तद्व्याधिहरमपि भवति, एवमेव यत् प्रायः रोगाणां प्रशमनं भेषजं भवति तत्र किञ्चदि भेषजं रसायनमपि भवति। रोगहरणात्मकं

किञ्चिद् भेषजं रोगहरणं तु करोत्येव तेन सहैव शरीरे बलत्वापादनं शरीरदाढ्र्यमपि च करोत्यत एवैतादृग्विधं भेषजं व्याधिहरं भवति। रसायनं वृष्यं च भेषजे शरीरे व्याधिक्षमत्वमुत्पादयत एव। अत एव उभयत्रापि उभयार्थकत्वं विणाते। अत्र स्वस्थोर्जस्करत्वं व्याधिहरत्वं च बाहुल्येन व्यवस्थाप्यते। आर्तरोगहरस्य सर्वस्य भेषजस्य स्वस्थोर्जस्करत्वं न व्यवस्थाप्यते, न च सर्वोर्जस्करस्य भेषजस्य रोगहरत्वं निर्दिश्यते। अस्मादेव कारणात् 'किञ्चिद्' इतिपदस्य प्रयोगो विहितः।

जो स्वस्थ के ऊर्जस्कर होता है प्रायः वह वृष्य और रसायन होता है, ऐसा आचार्यचरक कहते हैं। यहाँ प्रायः शब्द विशेषार्थरूप में प्रयुक्त हुआ है। क्योंकि जो प्रायः वृष्य होता है तथा जो प्रायः रसायन होता है वह बहुलता से होता है। कभी-कभी तो जो वृष्य और जो रसायन होता हे वह व्याधिहर भी होता है। इसी तरह जो प्रायः रोगों का प्रशमन करने वाली भेषज होती है उसमें कुछ भेषज रसायन भी होती है। रोग का हरण करने वाली कुछ भेषज रोग का हरण तो करती ही है, उसके साथ ही शरीर में बल की प्राप्ति करवाती है तथा शरीर में दृढता भी उत्पन्न करती है, इसलिए इस तरह की भेषज व्याधि का हरण करने वाली होती है। रसायन और वृष्य (वाजीकरण) औषध शरीर में व्याधिक्षमता (रोगप्रतिरोधक क्षमता) उत्पन्न करती हैं। इसलिए दोनों में ही दोनों ही कर्म करने की सामर्थ्य होती है। इसमें स्वस्थोर्जस्करत्व और व्याधिहरत्व बाहुल्य से है। रोगी के रोग का हरण करने वाली सभी औषधियों का स्वस्थोर्जस्करत्व नहीं बताया जाता तथा न ही सभी ऊर्जस्कर औषधियों का रोगहरत्व निर्दिष्ट किया जाता है। इसी कारण से 'किञ्चित्' इस पद का प्रयोग किया गया है।

**बहवः संवत्सराः जाताः, नियमितरूपेणाहं भारती-पत्रिकाया आयुर्वेदस्तम्भस्य माध्यमेन ऋषिप्रणीतानां सिद्धान्तानां तत्काले प्रयुक्तानाञ्च योगानां तदनुमतानाञ्च योगानां समये समये विद्वज्जनानां सम्मुखे प्रस्तुतीकरणं करोमि। क्रमेऽस्मिन् मेथीमोदक-कौंचपाक-अश्वगन्धापाक-एरण्डपाक-आर्द्रकपाकेत्यादीनां बहूनां रसायन-वाजीकरणात्मकानां पाकप्रख्यानां योगानां प्रस्तुतीकरणं विहितं मया। ये हि सावहितचित्ताः सुधीजनाः सन्ति तैः प्रशंसितं प्रस्तुतीकरणमेतत् संरक्षितमपि च। विशेषरूपेण हेमन्ते शिशिरे च प्रयोक्तव्यानामेतेषां पाकस्वरूपाणां रसायन-वाजीकरणप्रधानानां योगानां पुनः पुनः स्मरण-मवचयनमन्वेषणञ्च कृत्वा सेवनं करणीयमनयोः हेमन्तशिशिरयोरपि। अत्र तु नवीनस्यैकस्यैव योगस्योल्लेखः क्रियते। अग्रिमेषु केषुचिल्लेखेषु रसायन-वाजीकरणयोः किञ्चिद् वैशिष्ट्यं वक्ष्यामि, इति मे मनः। निश्चितरूपेण लिखिष्यामीति तु न।**

अनेक वर्ष हो गए, मैं नियमित रूपसे 'भारती' पत्रिका के आयुर्वेदस्तम्भ के माध्यम से ऋषिप्रणीत सिद्धान्तों को और उस समय (प्राचीनकाल में) प्रयुक्त किए जाने वाले रोगों को और उन सिद्धान्तों के अनुरूप बाद में भी प्रयुक्त किए जाने वाले (अनुमत) योगों को समय-समय पर विद्वानों के सम्मुख प्रस्तुत करता हूँ। इसक्रम में मेथीमोदक, कौंचपाक, अश्वगन्धापाक, एरण्डपाक, आर्द्रकपाक इत्यादि अनेक रसायन-वाजीकरण स्वरूपक पाक नाम से पुकारे जाने वाले योगों का प्रस्तुतीकरण मेरे द्वारा किया गया है। जो सावधान (सजग) सुधीजन हैं उनके द्वारा इस प्रस्तुतीकरण की प्रशंसा भी की गई है और इसे संरक्षित भी किया गया है। विशेष रूप से हेमन्त और शिशिर ऋतु में प्रयुक्त किए जाने योग्य पाकस्वरूपक रसायन-वाजीकरणप्रधान योगों का पुनः पुनः स्मरण, अवचयन और अन्वेषण करके इस हेमन्त और शिशिर ऋतु में भी सेवन करना चाहिए। यहाँ तो एक नवीन योग का उल्लेख किया जा रहा है। आगे लिखे जाने वाले किन्हीं लेखों में रसायन और वाजीकरण का कुछ वैशिष्ट्य कहूँगा, ऐसा मेरा मन है। निश्चित रूप से लिखूँगा ही ऐसा तो नहीं है।

**बृहज्जीरकादि-मोदकः-**

**जीरकं, कृष्णजीरं, कुष्ठं, शुण्ठी च पिप्पली, मरिचं, हरीतकी, बिभीतकं, आमलकी, त्वक् च, पत्रमेला च केशरम् (नागकेशरम्), शुभा, लवङ्गं, शैलेयं, रक्तचन्दनं, श्वेतचन्दनं, काकोली, क्षीरकाकोली, जातीकोषफले तथा, यष्टी, मधुरिका, मांसी, मुस्तं, सौवर्चलं, शटी, धन्याकं, देवदाली च मुरा, द्राक्षा तथा नखी, शतपुष्पा, पद्मं, मेथी च सुरदारु च सजलं सैन्धवञ्चैव, गजपिप्पली, वनिता (प्रियङ्गु) कर्पूरञ्चैतानि सर्वाणि द्रव्याणि समांशिकानि गृहीतव्यानि। यद्यप्येतानि द्रव्याणि बहुसंख्यात्मकानि सन्ति पुनरप्येतानि सर्वाण्यापणे सहजरूपेणाल्पायासेनैव मिलन्ति। ये हि 'पंसारी' इति नामधेयाः व्यवसायिनः सन्ति ते**

**जानन्ति ददति च। पुनरपि यद्येतानि सर्वाणि न मिलन्ति चेत्तदा यथोपलब्धान्येव संगृह्य सुशुद्धानि तानि सुकुट्टयेत्। सामान्यतया दशग्रामपरिमितायां मात्रायामेव प्रत्येकस्य द्रव्यस्य ग्रहणं करणीयम्।**

**बृहत् जीरकादि मोदक-**

जीरा, कालाजीरा, कूठ, सोंठ, पीपल, मरिच, हरड़, बहेड़ा, आँवला और दालचीनी, तेजपत्र, इलायची, नागकेशर, वंशलोचन, लौंग, छडीला, लालचन्दन, सफेदचन्दन, काकोली, क्षीरकाकोली, जावित्री, जायफल, मुलहठी, सोया, जटामांसी, नागरमोथा, कालानमक, कचूर, धनिया, देवदासी, मुरा (मरोडफली) द्राक्षा तथा नखी, सौंफ, पद्माख, मेथी, देवदारू, सुगन्धबाला, सैन्धव, गजपिप्पली, प्रियङ्गु और कर्पूर इन सभी द्रव्यों को समान मात्रा में लें। यद्यपि ये सभी द्रव्य संख्या में अधिक हैं फिर भी ये सभी बाजार में सहज रूप से थोड़े से प्रयास (श्रम) से ही मिल जाते हैं। जो पंसारी नाम के व्यापारी हैं वे इन सभी को जानते हैं और दे देते हैं। फिर भी यदि ये सभी न मिले तो जितने मिले उतने लेकर साफ करके उन्हें अच्छी तरह से कूटे। सामान्यतया प्रत्येक द्रव्य को दश ग्राम की मात्रा में लेना चाहिए।

**सुकुट्टितस्य चूर्णरूपे जातस्य वस्त्रेण सुपूतस्यास्य द्रव्यसमूहस्य परिमाणम् (उत्तोलन) करणीयम्। अनुमानतोऽम् परिमाणं चतुःशतग्रामपरिमितं भवति। एतन्मात्रात्मकस्य (सर्वतुल्यस्य) भृष्टस्य सुकुट्टितस्य वस्त्रपूतस्य श्वेतजीरकस्य ग्रहणं चतुःशतग्रामपरिमितायां मात्रायां कर्तव्यम्। चतुर्गुणात्मिका च शर्करा 1600 ग्रामपरिमिता गृहीतव्या। तया शर्करया द्वितन्त्वात्मिका मत्स्यण्डिका विधेया। चुल्लिकातोऽवतार्य तस्यां मत्स्यण्डिकायां पूर्वविनिर्मितं चूर्णं भृष्टजीरकचूर्णेन समं प्रक्षिप्य सम्यक् विमर्दयेत्। तत्क्षणमेव च 100 ग्रामपरिमितं घृतं देयम्। शीतीभूते च तस्मिन् पाके यत्नपूर्वकं मधु 100 ग्रामपरिमितमेव सम्मिश्रयेत्। कवोष्णेऽपि मधुमिश्रणं न कर्तुं शक्यते। पश्चाच्च यत्नपूर्वकमेव 10 ग्रामपरिमितायां मात्रायां मोदकाः विधेयाः तेन सञ्जातपाकेन द्रव्यसमूहेन।**

अच्छी प्रकार से कूटे हुए चूर्णरूप में हुए इस द्रव्यसमूह को तौल लेना चाहिए। अनुमान से इसका परिमाण 400 ग्रा. होता है। इतनी ही मात्रा वाले (समान मात्रा वाले) भुने हुए अच्छी प्रकार से कूटे हुए कपड़े से छने हुए सफेद जीरे को 400 ग्राम की मात्रा में लेना चाहिए। इससे चार गुनी 1600 ग्राम मात्रावाली शर्करा लेनी चाहिए। उस शर्करा में दो तार वाली चासनी बनानी चाहिए। चूल्हे से उतार कर उस चासनी में पहले बनाए गए चूर्ण को भुने जीरे के चूर्ण के साथ डालकर अच्छी प्रकार से मर्दन करे। उसी समय इसमें 100 ग्राम घी डालना चाहिए। ठण्डा हो जाने पर इस पाक में सावधानी से प्रयत्नपूर्वक 100 ग्राम मधु मिलाना चाहिए। थोड़े से गर्म में भी शहद का मिश्रण नहीं कर सकते। (शास्त्र में गर्म चीज के साथ शहद का मिश्रण निषिद्ध है)। इसके बाद यत्नपूर्वक ही उस पाक हुए द्रव्यसमूह से दश ग्राम की मात्रा में लड्डू बना लेने चाहिए।

**प्रतिदिनं प्रातरुत्थाय शौचादिभ्यः निवृत्तः सन् यथादोषं यथाबलं समुचितमात्रायां भक्षयेत्। सामान्यतया निरापन्मात्रा तु दश ग्रामपरिमितैव। अनुपानं तु सशर्करं गव्यं क्षीरं समुचितं भवति। अस्य प्रयोगेणोदररोगाः प्रशान्तिमापद्यन्ते। विशेषेण त्वग्निमान्द्यमपनयत्येषः मोदकः। अतीसारं विशेषेणा मातीसारं ग्रहणीदोषञ्च नाशयति। अर्शोरोगे हितोऽष्टविधमुदरशूलं नाशयति। जीर्णज्वरे विषमज्वरेऽपि च हितकारकः तयोः शमनानन्तरमपि प्रयोक्तव्यः। स्त्रीषु प्रदरनाशकः (श्वेतप्रदरं रक्तप्रदरमपि च) एषः सर्वाङ्गिकं दाहं नाशयति। अयं सर्वगदोच्छेदी प्रसिद्धः जीरकाद्यो हि मोदकः वर्तमानकाले सर्वव्याप्यग्निमान्द्ये परमोपयोगी सर्वैरपि सेवनीयो वर्तते। यदि चेन्निर्माणे दुष्करमनुभूयते तदा तु वैद्यतः प्राप्तव्यः सेवनीयो ह्येषः पाकस्वरूपात्मकः योगः। ग्रीष्मेऽपि सेवनीयोऽयं पाकः।**

प्रतिदिन सुबह उठकर शौचादि से निवृत्त होकर दोष और बल के अनुसार उचित मात्रा में खाना चाहिए। सामान्यतया निरापद मात्रा दश ग्राम परिमाण में ही है। इसका अनुपान तो शक्कर मिला हुआ गाय का दूध उपयुक्त रहता है। विशेषरूप से यह मोदक अग्निमान्द्य को दूर करता है। अतीसार को विशेषरूप से आमातीसार को और ग्रहणीदोष को नष्ट करता है। अर्शोरोग (मस्सों) में हितकर यह मोदक अष्टविध उदरशूल को नष्ट करता है। जीर्णज्वर और विषमज्वर में भी हितकारक यह उनके शमन के बाद भी प्रयुक्त करना चाहिए। स्त्रियों में प्रदर को (श्वेतप्रदर और रक्तप्रदर को भी) नष्ट करने वाला यह सर्वाङ्गिक दाह को नष्ट करता है। यह सब रोगों को उखाड़ कर फेंकने वाला प्रसिद्ध जीरकादि मोदक वर्तमानकाल में सर्वव्यापी अग्निमान्द्य में परमोपयोगी है और सबके द्वारा सेवनीय है। यदि बनाने में कठिनाई हो तो वैद्य से प्राप्त करना चाहिए यह पाकस्वरूपात्मक सेवनीय योग। यह पाक ग्रीष्म में भी सेवन करने योग्य है।

80, सेनापति हाउस के पीछे,
प्रेमनगर, झोटवाड़ा, जयपुर

नारी-स्तम्भः

# एकतः सर्वपापानि मद्यपानं तथैकतः

❑ डा. राजेश्वरी भट्ट



अनन्तदोषाणां दुःखानां दुर्व्यसानानाञ्च उद्भावकं मद्यपानं महता प्रयत्नेन वार्यमाणमपि लोकेऽनुदिनं वर्द्धमानं दृश्यते। पूर्वम् अङ्गुलिगण्या विशेषेण वैभववन्तो विलासवन्तो जना एव रहसि स्थित्वा मद्यपाने प्रवृता अभवन्। किन्तु अद्य तु मद्यपानं प्रासादात् पर्णकुटी- पर्यन्तमभीष्टं पेयं जातम्। अधुना मद्यपानव्यसने प्रौढा युवकाः किमधिकं किशोरा, यत्र कुत्रचित् पाश्चात्यरंगेण रञ्जिताः किशोर्योऽपि मद्यपानं युगधर्मं गणयन्ति। नववर्षस्य पूर्व संध्यायां महानगरेषु स्थितासु भोजनपण्यशालासु, नृत्यशालासु संगीतशालासु मदिरालयेषु च मदिराया नदी प्रवहतीव प्रतीयते। दीर्घं यावन्मदिरापानेन प्रमत्ताः स्खलितगतयो मद्यपायिनो मध्यरात्र्यनन्तरं यथा कथञ्चिद् गृहे प्रविशन्ति यत्र भर्तुः प्रतीक्षारतानां नारीणां भाग्ये विलपनमेव विकल्पो विद्यते। एतदतिरिक्तम् आधुनिकताया उद्घोषकानां जनानां गृहे उत्सवेषु समारोहेषु च मद्यपानस्य विशेषव्यवस्थां विना अपूर्णता मन्यते। मद्यपानस्य अहरहः प्रसक्तं प्रचलनं मानवानां कृते दुरन्तं भवति। अधिकमद्यपानेन धनं नश्यति, शरीरं शुष्यति, कीर्तिः कुञ्चति, नारी क्लिश्नाति, बान्धवास्त्यजन्ति तम्। एवंगतेऽपि आत्मविमुखा जनाः सम्प्रवृत्ते रजनीमुखे मदिरालयस्य मार्गे सहजेनैव पदं क्रमन्ति। मद्यपानं प्रति जनानां महत्यभिरुचिर्नास्ति मङ्गलकरी। आदिकालादेव मदिरापानं लोके महत्पापं गण्यते। मद्यपानात् चित्ते भ्रान्तिर्जायते, भ्रान्तः पुरुषः पापे प्रवृत्तो भवति पापाचारी नूनं दुर्गतिं प्राप्नोति। अतएव मद्यपानं कदापि न करणीयम्। कथितञ्च -

**चिते भ्रान्तिर्जायते मद्यपानात् भ्रान्ते चित्ते पापचर्यामुपैति पापं कृत्वा दुर्गतिं यान्ति मूढास्त-स्मान्मद्यं नैव पेयं न पेयम्।।**

सुभाषितरत्नाकर

अतीतस्य पृष्ठैर्ज्ञायते यद् दुर्ग्रहेण मद्यपानदुर्व्यसनेन अनेकानि राजकुलानि नाममात्राण्यवशिष्टानि। बहूनां तु नामान्यपि विलुप्तानि। अस्मिन् प्रसङ्गे, सुरासुन्दर्योः आसक्तस्य राज्ञः अग्निवर्णस्य चरित्रं प्रमाणं वर्तते येन रघुवंशस्य कीर्तिकरैः दिलीपरघु अज दशरथ सदृशैः नृपैरर्जितं यशः राज्यञ्च परहस्तगतं कृतं रघुवंशोद्भवो राजा अग्निवर्ण राजकार्यमवधीरयन् प्रजायाः दुःखमशृपवन्, सुखासक्तः स सुन्दरीभिःसह मद्यपानगन्धेन सुवासितायां मद्यशालायां एवं प्राविशद् यथा गजः करिणीभिः सह कमलिनीसरोवरं प्रविशति।

**कथितञ्च -**

**घ्राणकान्तमधुगन्धकर्षिणीः पानभूमिरचनाः प्रियासखः**
**अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः।।**

रघुवंशः।।

पञ्चमवेदेन महाभारतेन ज्ञायते यत् अधिक मद्य-सेवनेन यदुवंशस्य विनाशोऽभवत्। मौसलपर्वणि प्रासेन प्रसङ्गेन ज्ञायते यत् मद्यपानेनोन्मत्तः सात्यकिः प्रभासक्षेत्रे क्रोधेन अहंकारेण च कृतवर्मणोऽपमानं कृतवान् इयमेव अप्रियघटनायया परस्परविवादेन सर्वे यदुवंशीया युद्धे विनष्टा जाताः।

**कथितञ्च - ततः परिषदो मध्ये युयुधानो मदोत्कटः।**
**अब्रवीत् कृतवर्माणमवहस्यावमन्य च।।**

महाभारत, मौसलपर्व 3.।।

युगयुगेभ्यः सन्तः, कवयः राष्ट्रहितचिन्तकाश्च मद्यपानोन्मूलनाय प्रयत्नवन्तो दृश्यन्ते। अधुना 3 नवम्बर 2015 तमे वर्षे राजस्थानप्रदेशे मद्यपानस्य पूर्ण- निषेधो भवेदिति दृढसंकल्पस्य क्रियान्वयनाय 33 दिनानि यावदनशनमाचरतः राष्ट्रनिष्ठस्य पूर्वविधायकस्य गुरुशरण छाबड़ा महाभागस्य निधनं जातं। राष्ट्रहिते कृतं ईदृशं अपूर्वं बलिदानं सम्भवतः केषाञ्चन मद्यपायिनां कृते हृदयपरिवर्तनाय प्रेरणास्पदं भवेद् येन परिवारेषु नारीणां स्थितिरपि सुदृढा भवेत्।

**हिन्दी**

अनन्त दोषों, दु:खों एवं दुर्व्यसनों का उद्भावक (मूलकारण) मद्यपान अत्यन्त प्रयत्न से रोके जाने पर भी प्रतिदिन बढ़ता ही जा रहा है। पहिले अङ्गुलिगण्य (कुछ) लोग विशेष रूप से वैभव एवं विलास से सम्पन्न व्यक्ति एकान्त में लोगों की नजर से बचकर मद्यपान करते थे। किन्तु आज तो महलों से झोपड़ी तक शराब लोगों का अभीष्ट पेय है। आजकल मद्यपान के व्यसन में केवल प्रौढ एवं युवक ही प्रवृत्त नहीं है अपितु किशोर एवं कहीं कहीं पाश्चात्य रंग में रंगी हुई किशोरियाँ भी मद्यपान करना युगधर्म मानती हैं। नववर्ष की पूर्व संध्या को महानगरों के होटलों, नृत्यशालाओं, संगीतशालाओं एवं मदिरालयों में शराब की मानों नदी ही बहने लगती है। लड़खडाते हुए शराब पीकर मस्त हुए ये मद्यपी आधी रात के पश्चात् घर में प्रवेश करते है जहाँ पति की प्रतीक्षा में बैठी हुई पत्नी के लिए विलाप करना ही विकल्प होता है। इसके अतिरिक्त आधुनिकता की दुहाई देने वाले लोगों के घर उत्सवों एवं अन्य समारोहों में मद्यपान की विशेष व्यवस्था के बिना अपूर्णता प्रतीत होती है। दिनों दिन शराब पीने का फैलता हुआ प्रचार दु:खद अन्त वाला है। अधिक मद्यपान करने से धन का नाश होता है शरीर का शोषण एवं कीर्ति कलंकित होती है नारी दु:खी रहतीहै बन्धुगण दूर हो जाते हैं। इतना होने पर भी आत्मविमुख जन रात्रि के प्रारम्भ होते ही मदिरालय की ओर चल देते हैं। मद्यपान की ओर लोगों की इतनी अधिक रुचि अमङ्गलकारी है। आदिकाल से ही शराब पीना लोक में महान् पाप समझा जाता है। मद्यपान करने से चित्त में भ्रान्ति उत्पन्न होती है, भ्रान्त व्यक्ति पाप करता है, पाप करने वाले की दुर्गति होती है इसलिए मद्यपान नहीं करना चाहिए। अतीत के पृष्ठों से ज्ञात होता है कि कठिनता से छूटने वाले मद्यपान दुर्व्यसन से अनेक राजकुलों का नाम मात्र शेष है। कुछ राजकुलों के तो नाम भी लुप्त हो चुके हैं। इस प्रसङ्ग में सुरा सुन्दरी में सर्वथा आसक्त राजा अग्निवर्ण का चरित्र प्रत्यक्ष है जिसके द्वारा रघुवंश की कीर्ति को अक्षुण्ण करने वाले दिलीपरघु-अज तथा दशरथ जैसे राजाओं द्वारा अर्जित राज्य एवं यश को शत्रु के अधीन कर दिया। रघुवंशी राजा अग्निवर्ण राजकार्य की उपेक्षा करते थे एवं प्रजा के कष्टों को न सुनकर सुख में आसक्त रहते थे। सुन्दर स्त्रियों के साथ सुवासित मद्यशाला में इस प्रकार प्रवेश करते थे मानों हाथी अपनी हथिनियों के साथ कमलिनी के वन में विहार करने जा रहा हो। रघुवंश 19.11। पंचम वेद महाभारत से ज्ञात होता है कि अधिक शराब पीने से यदुवंश का विनाश हुआ। महाभारत के मौसलपर्व से ज्ञात होता है कि मद्यपान करने से उन्मत्त सात्यकि ने क्रोध एवं अहंकार के वशीभूत होकर कृतवर्मा का अपमान एवं उपहास किया यह अप्रिय घटना ही परम्पर विवाद से युद्ध में परिवर्तित हो गई एवं वहाँ उपस्थित मद्यपान से मत्त यदुवंशी युद्ध में विनष्ट हो गए। कहा भी गया है –

तदनन्तर मद से उन्मत्त सात्यकि ने सभा के मध्य में कृतवर्मा की हँसी उडाई एवं अपमान भी किया।

महाभारत मौसल पर्व 3.11

युग युगों से सन्त पुरूष, कवि एवं राष्ट्र हितचिन्तक मद्यपान के उन्मूलन के लिए प्रयासरत हैं। अभी हाल ही में 3 नवम्बर 2015 ई-राजस्थानप्रदेश में पूर्ण शराब बन्दी हो इस दृढ़ संकल्प को कार्यरूप में परिणत करने के लिए 33 दिनों तक अनशन करने वाले राष्ट्रनिष्ठ, पूर्व विधायक गुरुशरण छाबड़ा का निधन हो गया। राष्ट्र के हित में ऐसा अपूर्व बलिदान सम्भवत: कुछ मद्यपियों के हृदय परिवर्तन के लिए प्रेरणास्पद हो जिससे परिवारों में नारियों की स्थिति भी सुदृढ़ हो सके।

# प्रेरक-प्रसङ्ग-शतकम्

❑ **श्रीमती आराधना धर्माधिकारी**

**त्रयस्त्रिंश:प्रसङ्ग:**- परीक्षणं पत्न्या: कृतं जातं स्वस्यैव।

एकस्मै सज्जनाय सन्देह आसीत् पत्न्या: बधिरत्वस्य। स चिकित्सकस्य समीपे गत:। चिकित्सकस्तं परीक्षणस्य सरलमुपायमबोधयत्। स अवदत् त्वं पूर्वं दूरतस्तया वार्तालापं कुरु, यदि सा न शृगयात्तदा किञ्चित्समीपे गत्वा कुरु, तदापि न शृणुयाच्चेत्तदाधिकसमीपे गत्वा कुरु, एवं यावदुत्तरं न प्राप्नोति तावत्समीपे वर्द्धस्व। तस्मिन्नेव सायंकाले स एकस्मिन् कक्षे उपविश्य पाकगृहे उपविष्टां तामपृच्छत्-अयि! शृणोषि अद्य किं पाचयसि? परमुत्तरं नैव प्राप्तवान्। पुन: किञ्चित्समीपे गत्वा अपृच्छत्परमुत्तरं नैव प्राप्तवान्। अथाधिक समीपे गत्वाऽपृच्छत् ततोऽपि नोत्तरं प्राप्तवान्। ततश्चातिसमीपे तत्पृष्ठत एव स्थित्वाऽपृच्छत् तदा सा अवददहं पंचमवारं कथयामि तन्दुलद्विदलमिश्रितं संयावं (खिचडी) पाचयामीति। एवं प्रतिवारं तया तूत्तरितं तेनैव न श्रुतमिति परीक्षणं तस्यैव संजातम्।

218, धर्माधिकारिभवनम्, ब्रह्मपुरी, जयपुरम्

# Ekal Vidyalaya







**WHAT IS EKAL VIDYALAYA?**
Ekal Vidyalaya means One teacher One School Ekal Vidyalaya is a unique concept that aims to bring education to the doorstep of a village where children are offered five years of schooling and primary health care free of cost.

**SCHOOL STRUCTURE**
One school has 35 to 45 children of age group of 5 to 16. It is often conducted under the shade of big tree or hut.

**TEACHER**
Teacher from local villages are specially trained to become catalysts for change and for building hope for the entire village.

**THE CURRICULUM**
A Panel of Educationists has developed curricula, which is aligned with government prescribed texts and local culture. Emphasis is given on health, hygiene, character and ethical values.

# JANKALYAN PRATHISTHAN

Amrit Bhog Complex, Kalikasthan, Dili Bazar.
Post Box No. 12105, Kathmandu, Nepal
Phone : 00977 14443674, Fax: 009771 4444020

**Contact in Europe**
Mr. Bitthal Maheshwari
Post box No.122703, 55743 Idar-Oberstein Germany
Phone No.00491726699191, 00491726158359
E-Mail : bitthat.m@gmail.com / rcjain43@gtnail.coni

**Mr. Hasmukh Velji Bhai Shah**
19 Chellow Lane, Bedford BD9 6AX, West Yorkshire, (U.K)
Telephone : 00447771765200, 004417274820568
E-mail : akhandhind@gmail.com

**Contact in Middle-east**
Mr. Mahesh Devjibhai Sagar, Post Box No. 1428
Manama, Kingdom of Bahrain
Phone No.: 0097339658802, 00971506406697
E-mail : rndevji@batelco.com.bh

भारती के सभी पाठकों को दीपावली की हार्दिक शुभकामनाऐं :-
रमेश मुलतानी
विनोद मुलतानी
0141-2564802
09829014802
09829014602



भारती के सभी पाठकों को
दीपावली
की हार्दिक शुभकामनाऐं



राकेश कुमार खण्डेलवाल
9829060582
राजेन्द्र कुमार खण्डेलवाल
9829060317



रामअवतार खण्डेलवाल
9829064377
श्यामसुन्दर खण्डेलवाल
9829044661

# रामेश्वर खण्डेलवाल
9829056741
20-21, जय जवान कॉलोनी, टोंक रोड़, जयपुर

**संरक्षक**

श्री बलराम सत्संग मंडल ट्रस्ट (रजि.) जयपुर

**उपाध्यक्ष**

1. विद्या भारती राजस्थान क्षेत्र
2. योग क्षेम सेवा न्यास राजस्थान
3. श्री रामानन्द सन्त सेवा न्यास गलता घाटी, जयपुर

**ट्रस्टी**

1. श्री रामानन्द आश्रम, गोवर्धन
2. श्री राम तपस्थल प्राचीन राममंदिर ब्रह्मपुरी (हरिद्वार)

**अध्यक्ष**

1. विद्याभारती जनशिक्षा न्यास राजस्थान
2. भारतीय जन सेवा प्रतिष्ठान राजस्थान
3. श्री बलराम भारतीय शिक्षा समिति
4. श्री बलराम दास जी जन्मशताब्दी समारोह समिति
5. श्री आमण माता सेवा समिति
6. श्री आमेरिया चैरीटेबिल ट्रस्ट जयपुर

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

भारती के सभी पाठकों को दीपावली की हार्दिक शुभकामनाऐं







# मोहनलाल गुप्ता

## विधायक

## (किशनपोल विधानसभा क्षैत्र) जयपुर

पनिहारिन आर्ट्स, ई–102, शास्त्रीनगर, जयपुर
मो.: 9829010175

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली–11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011–47642000 से 30 फैक्स: 011–47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,